Note:—पूर्धि is from पृ 'to protect'. The शप् is elided; for the final ॠ there is उर् by VII. 1. 102. S. 2495 and it is lengthened by VIII. 2. 77 S. 354 उरु णस्कृधि from कृ; the न of नस् is changed to ण by VIII. 4. 27 S. 3649 and the visarjanîya is changed to स by VIII. 3. 50. S. 3635.

३५५२ । वा छन्दसि । ३ । ४ । ८८ ।

हिरपिद्वा ।

3552. In the Chhandas the substitute 'hi' is optionally treated as not having an indicatory 'p.'

The result is that in the Chhandas, the second person singular of लोट् has two forms, as प्रीणाहि or प्रीणीहि; युयुधि or युयोधि, धि being substituted for हि in the Vedas (by VI. 4. 103 S. 3553) as in the following verse:

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

Rig Veda I. 189. 1: Yajur Veda, 40. 16.

३५५३ । अङितश्च । ६ । ४ । १०३ ।

हेर्धिः स्यात् । रारन्धि । रमेर्व्यत्ययेन परस्मैपदम् । शपः श्लुरभ्यासदीर्घश्च । 'अस्मे प्रयन्धि' 'युयोधि जातवेदः' । यमेः शपो लुक् । यौतेः शपः श्लुः । 'अङितः' किम् । प्रीणीहि ।

3553. 'Dhi' is substituted for 'hi' when the tense-affix is not 'ṅit'.

Under III. 4. 88 S. 3552 सि is also पित् in the Vedas : and when it is पित्, it is not ङित् by I. 2. 4. Thus रारन्धि, प्रयन्धि and युयोधि in the following सोमरारन्धि ; अस्मभ्य तद्धर्यश्व प्रयन्धि; युयोध्यस्मज् जुहुराणमेनः ॥

Why do we say 'when it is not ङित्' ? Observe प्रोयोधि ॥

(1) रारन्धि is irregularly formed Parasmaipada of रम ; the शप being replaced by श्लु, and the reduplicate lengthened as a Vedic form. The म् is not elided, by VI. 4. 37 as the affix is not ङित् ॥ (2) प्रयन्धि is from यम the शप् is elided. (3) युयोधि from यु (यौति), the शप् being replaced by श्लु; युयोधि जातवेदः (Rig Ved. VIII. 11. 4).

३५५४ । मन्त्रेष्वाङ्यादेरात्मनः । ६ । ४ । १४१ ।

आत्मन्शब्दस्यादेर्लोपः स्यादाङि । 'त्मना देवेषु' ।

3554. In the Mantras, the beginning of 'âtman' is elided, when the affix of the Instrumental Singular follows.

आङ् is the name of the Instrumental singular affix, given by ancient Grammarians. Thus त्मना देवेषु (Rig Ved. VII. 7. 1).

३५५५ । विभाषर्जोश्छन्दसि । ६ । ४ १६२ ॥

ऋजुशब्दस्यर्तः स्थाने रः स्याद्वा इष्टेमेयस्सु । 'त्वं रजिष्टमनुनेषि' । ऋजिष्ठं वा ।

3555. Before the affixes ishṭha, iman and îyas, the 'ṛi' of 'ṛiju' may optionally be changed to 'ra' in the Chhandas.

As. रजिष्ठः and ऋजिष्ठः, in त्वं रजिष्ठमनुनेषि (Rig Ved. I. 91. 1).

३५५६ । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि । ६ । ४ । १७५ ।

ऋतौ भवमृत्व्यम् । वास्तुनि भवं वास्तव्यम् । वास्त्वं च । मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते । 'माध्वीर्नः सन्त्वोषधीः' । हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते । 'हिरण्ययेन सविता रथेन' ।

इति षष्ठोऽध्यायः ।

3556. In the Chhandas the following are irregularly formed: Ṛitvya, Vâstvya, Vâstva, Mâdhvî, and Hiraṇyaya.

The word ऋत्व्य is derived from ऋतु, and वास्त्व्य from वास्तु with the affix यत्, उ being changed to व ॥ ऋतौ भवम् = ऋत्व्यम्, वास्तौ भवम् = वास्त्व्यम् ॥ वास्त्व is from वस्तु, as वस्तुनि भवः = वास्त्वः with the affix अण् ॥ माध्वी from मधु with the affix अण् in the feminine as 'माध्वीर्नःसन्त्वोषधीः' Rig Ved. I. 90. 6. हिरण्यय is from हिरण्य with the affix मयट्, the म being elided, as 'हिरण्ययेन सविता रथेन' (Rig Ved. I. 35. 2.)

CHAPTER VII.

'शीङो रुट्' (२४४२) ।

By VII. 1. 6 S 2142; the augment रुट् is added to the--tense-affix झत the 3rd Person Plural Atmanepade. But in the Vedas the augment is added to other affixes also.

३५५७ । बहुलं छन्दसि । ७ । १ । ८ ।

रुडागमः स्यात् । 'लोपस्त आत्मनेपदेषु' (३५६३) इति पक्षे तलोपः । 'धेनवो दुह्रे' । लोपाभावे घृतं दुह्रते' । 'अदृश्रमस्य' । 'अतो भिस ऐस्' (२०३) ।

3557. The augment 'ruṭ' is diversely applied in the Chhandas.

The त of अत is elided by VII. 1. 41. S. 3563, in one alternative. Thus धेनवो दुह्रे ॥ When then there is no elision, we have घृतं दुह्रते । So also अदृश्रमस्य ॥

देवा अदुह्र ; गन्धर्वा अप्सरसो अदुह्र ॥ Here अदुह्र is the Imperfect (लङ्) plural of दुह् ॥ Thus दुह् + झ = दुह् + रत् = अदुह्र, the त् being elided by VII. 1. 41. Sometimes, the augment does not take place, as अदुहत ॥ Owing to the word बहुल, 'diversely', the augment र is added to other affixes also, than झ ॥ As अदृश्रम् in अदृश्रमस्य केतवः ॥ This is the aorist in लुङ् of the root दृश by III. 1. 57. the guṇa ordained by VII. 4. 16, does not take place.

By VII. 1. 9 S. 203 ; ऐस् is substituted for भिस् in the Instrumental Plural after nouns ending in अ. But not always so, in the Vedas.

३५५८ । बहुलं छन्दसि । ७ । १ । १० ।

'अग्निर्देवेभिः' ।

3558. In the Chhandas the substitution takes place diversely.

That is ऐस् is substituted for भिस् even after stems which do not end in short अ ; as नद्यैः ; and some times the substitution does not take place even after stems ending in short अ, as, देवेभिः, in देवोदेवेभिरागमत् (Rig Veda I. 1, 4).

३५५९ । नेतराच्छन्दसि । ७ । १ । २६ ।

स्वमोरदड् न । 'वार्त्रघ्नमितरम्' । 'छन्दसि' किम् । इतरत्काष्ठम् । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (३३३२) ।

3559. In the Chhandas, *at* (or *ad*) is not the substitute of *su* and *am* (Nom. and Acc. Sg.) endings, after *itar*.

As इतरमितरमण्डमजायत ; वार्त्रघ्नमितरम् ॥ Why in the Vedas ? See इतरत् काष्ठम्, इतरत् कुड्यम् ॥

By VII. 1. 37. S. 3332, ल्यप् is substituted for *ktvá* in a compound the first member of which is an Indeclinable but not नञ् ॥ In the Vedas, this is optional.

३५६० । क्त्वापि छन्दसि । ७ । १ । ३८ ।

यजमानं परिधापयित्वा ।

3560. In the Chhandas the 'ktvâ' also, as well as lyap, is substituted for ktvâ, after an Indeclinable compound, other than one preceded by the Negative 'nañ.'

Thus कृष्णं वासो यजमानं परिधापयित्वा ॥

३५६१ । सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः । ७ । १ । ३९ ।

'ऋजवः सन्तु पन्थाः' । पन्थान इति प्राप्ते सुः । 'परमे व्योमन्' । 'व्योमनि' इति प्राप्ते ङेर्लुक् । धीती । मती । सुष्टुती । धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घः । 'या सुरथा रथीतमा दिविस्पृशा अश्विना' । 'यौ सुरथौ दिविस्पृशौ' इत्यादौ प्राप्ते आ । 'नताद्ब्राह्मणम्' । नतमिति प्राप्ते आत् । 'यादेव विद्म तात्वा' । यमिति प्राप्ते । 'न युष्मे वाजबन्धवः' । 'अस्मे इन्द्राबृहस्पती' । युष्मास्वस्मभ्यमिति प्राप्ते शे । उरुया । धृष्णुया । उरुणा धृष्णुनेति प्राप्ते या ।

'नाभा पृथिव्याः'। नाभाविति प्राप्ते डा। 'ता अनुष्ठ्योच्यावयतात्'। अनुष्ठानमनुष्ठा। व्यवस्थावदङ्। आङो ड्या। साधुया। साध्विति प्राप्ते याच्। 'वसन्ता यजेत'। वसन्त इति प्राप्ते आल्। '*इयाडियाजीकाराणामुपसंख्यानम्*'। उर्विया। दार्विया। उरुणा दारुणेति प्राप्ते इया। सुक्षेत्रियेति प्राप्ते डियाच्। 'दृतिं न शुष्कं सरसी शयानम्'। ङेरीकार इत्याहुः। तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता। वस्तुतस्तु ङीषन्तान्ङेर्लुक्। ईकारादेशस्य तूदाहरणान्तरं मृग्यम्। '*आङयाजयारामुपसंख्यानम्*'। 'प्रबाहवा सिसृतम्'। बाहुनेति प्राप्ते आङादेशः। 'घेर्ङिति' (२४५) इति गुणः। स्वप्नया। स्वप्नेनेति प्राप्तेऽयाच्। 'स नः सिन्धुमिव नावया'। नावेति प्राप्तेऽयार्। रित्स्वरः।

3561. The following irregular endings are substituted for the various case-endings in the Chhandas: (1) 's' of the Nom. Sg. for 'as' of the Plural, (2) the *luk*-elision of the case-endings, (3) the single substitution of the homogeneous long vowel for the end vowel of the stem, (4) â, (5) ât, (6) e (śe) for the ending of the Nom. Plural, (7) yâ, (8) â (ḍâ), with the elision of the last vowel and the consonant, if any, that follows it in the stem, (9) yâ (ḍyâ) with the similar shortening of the stem, (10) yâ, (yâch) and (11) 'â' (accent of 'la').

Thus (1) अनृक्षरा ऋजवः सन्तु पन्थाः (for पन्थानः) Rig Veda X. 85. 23.

Vârt:—It should be stated that case-endings replace case-endings promiscuously, as धुरि दक्षिणायाः (for दक्षिणायाम् Rig I. 164. 9).

Vârt:—One personal ending replaces another personal ending in the Vedas चषालं ये अश्वयूपाय तक्षति (for तक्षन्ति) Rig. I. 162. 6.

(2) लुक्-elision :—As परमे व्योमन् (Tait-up. II. 1. 1) for व्योमनि। Here is elision of ङि ॥

(3) Lengthening :—धीती, मती, सुष्टुती for धीत्या, मत्या and सुष्टुत्या ॥

(4) आ substitute :—As या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना ता हवामहे ॥ (Rig Ved. I. 22. 2). Instead of यौ, सुरथौ, दिविस्पृशौ, उभौ, &c. we have या, सुरथा, &c.

(5) आत्-नताद् ब्राह्मणम् for नतम् ॥ यादेव विद्म ता त्वा here या is for यम् ॥

(6) शे-न युष्मे (for युष्मासु) वाजबन्धवः, Rig. VIII. 68. 19. अस्मे (for अस्मभ्यम्) इन्द्राबृहस्पती; Rig. IV. 49. 4.

(7) या-उरुया, धृष्णुया for उरुणा and धृष्णुणा ॥

(8) डा-नाभा (for नाभौ) पृथिव्याः Rig. I. 143. 4.

(9) ड्या-अनुष्ठ्या उच्यावयतात् for अनुष्ठया Ait Br. II. 6. 15. अनुष्ठानेन भवान् विशसनं करोतु। The word अनुष्ठा (feminine) is derived from स्था with the affix अङ् (III. 3. 106) and the preposition अनु। In the Instrumental Singular, the टा is replaced by ड्या ॥ But is not the affix अङ् of III. 3. 106 set aside in the case of स्था by the specific affix क्तिन् of III. 3. 95? Not always, for Pâṇini himself has used forms like व्यवस्था (I. 1. 35) showing that स्था takes the affix अङ् also.

(10) याच्—साधुया for साधु; the elision of सु which was otherwise required does not take place.

(11) आल्-वसन्ता यजेत for वसन्ते ॥

Vârt:—The following substitutes should also be enumerated, (*a*) इया, (*b*) डियाच् with the elision of the final vowel and the consonant, if any, that follows it, and (*c*) long ई ॥ As (*a*) उर्विया परिधानम्, for उरुणा, so also दार्विया for दारुणा ॥ (*b*) सुक्षेत्रिया for सुक्षेत्रिणा, and सुगात्रिया for सुगात्रिणा ॥ (*c*) दृतिं न शुष्कं सरसी शयानम् (Rig Ved. VII. 103. 2) for सरसि ॥

The word सरसी however may be otherwise explained. The ordinary explanation is that ङि (Loc. Sing). is replaced by long ई of this Vârtika. The word ought to have udâtta on the first syllable, but anomalously the accent falls on the last. Thus say those who give this example. But as a matter of fact सरसी here is the feminine in ङीष् of सरस् ॥ The Loc. Sing. ङि is elided after it by clause (2) of this sûtra; and it is not an example of the addition of long ई to सरस् ॥ Well, what is then the example of ई substitution of this vârtika? That must be found out.

NOTE:—Sâyana also explains सरसी in this way दृतिं न ॥ दृतिमिव शुष्कं नीरसं सरसी महत्सरः; सरसी गौरादिलक्षणो ङीष्; सरस्यां "सुपां सुलुक्" इति सप्तम्यां लुक् । महति सरसि निर्जले घर्मकाले शयानं निवसन्तं मण्डूकगणाः ॥

Vârt:—So also (*a*) आड् (*b*) अयाच् and (*c*) अयार्: as प्रबाहवा सिसृतम् (Rig Ved. VII. 62. 5), for प्रबाहुना । The उ is gunatad to ओ by VII. 3. 111, and ओ is changed to अव् before आ (*b*) स्वप्नया सच सेवनम् for स्वप्नेन, (*c*) सिन्धुमिव नावया (Rig Ved. I, 97, 8) for नावा ॥ The र् in अयार् regulates the accent.

The word आच्छे in the sûtra is compounded of three words आ + आत् + शे, the word आत् = आ + आत् ॥

३५६२ । अमो मश् । ७ । १ । ४० ।

मिबादेशस्यामो मश् स्यात् । अकार उच्चारणार्थः । शित्वात्सर्वादेशः । 'अस्तिसिचः–' (२२२५) इति ईट् । 'वधीं वृत्रम्' । अवधिषमिति प्राप्ते ।

3562. For the Personal ending *am* of the First Person Singular (in the Aorist) *ma* (I. 1. 55) is substituted in the Chhandas.

The अम् here is the substitute of मिप्, and not the accusative singular affix. The अ in मश् is for the sake of pronunciation only. As वधीं वृत्रम् (for अवधिषम्) Rig. I. 165. 8: ॥ The अट् augment is diversely elided (VI. 4. 75). The indicatory श् of मश् shows that the *whole* of the affix अम् is to be replaced. The long ई is added by VII. 3. 96. The substitution of म् for म् is to prevent the change of म् into anusvâra as in VIII. 3. 25.

NOTE:—Thus हन् + च्लि + मिप् = वध् + च्लि + मिप् (II. 4. 43) = वध् + सिच् + मिप् (III. 1. 44) = वध् + इ + सिच् + मिप् = वध् + इट् + सिच् + अम् (III. 4. 101) = वध् + इट् + सिच् + म् (Present Sûtra) = वध् + इट् + सिच् + ईट् + म् (VII. 3. 96) = वध् + इट् + ईट् + म् (VIII. 2. 28) = वधीम् (VI. 1. 101).

३५६३ । लोपस्त आत्मनेपदेषु । ७ । १ । ४१ ।

छन्दसि । 'देवा अदुह्र' । अदुह्रतेति प्राप्ते । 'दक्षिणतः शये' । शेत इति प्राप्ते । 'आत्मने–' इति किम् । 'उत्सं दुहन्ति' ।

3563. In the Chhandas the *ta* of the Atmanepada Personal ending is elided.

As देवा अदुह्र for अदुहत (see VII. 1. 8) ; दक्षिणतः शये for शेते ॥ Owing to the anuvritti of अपि from VII. 1. 38, this substitution sometimes does not take place ; as : आत्मानमलंकुरुते ॥ Why in the Atmanepada ? Observe उत्सं दुहन्ति कलशं चतुर्बिलम् ॥

३५६४ । ध्वमो ध्वात् । ७ । १ । ४२ ।

ध्वमो ध्वादित्यादेशः स्याच्छन्दसि । 'अन्तरेवोष्माणं वारयध्वात्' । वारयध्वमिति प्राप्ते ।

3564. In the Chhandas, 'dhvât' is substituted for the Personal ending 'dhvam'.

As अन्तरेवोष्माणं वारयध्वात् for वारयध्वम् ॥ Ait Br. II. 6, 14.

३५६५ । यजध्वैनमिति च । ७ । १ । ४३ ।

एनमित्यस्मिन्परे ध्वमोऽन्तलोपो निपात्यते । 'यजध्वैनं प्रियमेधाः' । 'वकारस्य यकारो निपात्यते' इति वृत्तिकारोक्तिः प्रामादिकी ।

3565. यजध्वैनम् is irregularly formed in the Vedas for यजध्वमेनम् ॥

The word यजध्वम् followed by एनम् loses its final म् in the Vedas. As यजध्वैनं प्रियमेधः (Rig. VIII. 2. 37). The Kâśika adds "that व is also irregularly changed into य" : the form would then be यजध्यैनम् ॥ This is, however, a mistake.

३५६६ । तस्य तात् । ७ । १ । ४४ ।

लोटो मध्यमपुरुषबहुवचनस्य स्थाने तात् स्यात् । 'गात्रमस्यानूनं कृणुतात्' । कृणुतेति प्राप्ते । 'सूर्यं चक्षुर्गमयतात्' । गमयतेति प्राप्ते ।

3566. For the ending *ta* of the 2nd Pers. Pl. Imperative is substituted 'tât' in the Chhandas.

As गात्रं गात्रमस्या नूनं कृणुतात् (for कृणुत), and ऊवध्यं गोहं पार्थिवं खनतात् (for खनत) Ait Br. II. 6. 15, 16. अस्मारच्च संसृजतात् (= संसृजत), सूर्यं चक्षुर्गमयतात् (= गमयत).

३५६७ । तप्तनप्तनथनाश्च । ७ । १ । ४५ ।

तस्येत्येव । शृणोत ग्रावाणः । शृणुतेति प्राप्ते तप् । 'सुनोतन पचत ब्रह्मवाहसे' । 'दधातन द्रविणं चित्रमस्मै' । तनप् । 'मरुतस्तज्जुजुष्टन' । जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च । 'विश्वे देवासो मरुतो यतिष्ठन' । यत्संख्याकाः स्थेत्यर्थः । यच्छब्दाच्छान्दसो डतिः । अस्तेस्तस्य थनादेशः ।

3567. Also *ta* and *tana* (before both, on account of the indicatory *p* the preceding vowel of the verbal stem is strengthened, or if weak, not shortened), *tana* and *thana* are substituted for the *ta* of the 2nd Pers. Pl. Imperative in the Chhandas.

Thus (1) शृणोत ग्रावाणः (for शृणुत),

(2) सुनोतन पचत ब्रह्मवाहसे (Rig. Ved. V. 34. 1). सुनोतन = सुनुत ॥ दधातन द्रविणं चित्रमस्मै (Rig Ved. X. 36. 13). The indicatory प् makes तप् and तनप् non-ङित् affixes (I. 2. 4).

(3) तन :—मरुतः तज्जुजुष्टन (Rig Ved. VII. 59. 9). for जुषध्वम्, the Parasmaipada and Ślu are anomalous.

(4) थन :—विश्वेदेवासो मरुतो यतिष्ठन ॥ The pronoun यत् becomes यति by taking the affix डति ; and अस् 'to be.' अस् + त = अस् + थन = स्थन ॥ Padamanjari says,

"The Rig Vedins read यतिष्ठन instead of यतिष्टन in Samhitâ Pâṭha, of कोवस्ता मरुतो यतिष्टन ; and in Pada Pâṭha they read it as यतिस्थन ॥ In this case, it is derived from अस् "to be." Kâśikâ derives it from इष् "to wish."

३५६८ । इदन्तो मसि । ७ । १ । ४६ ॥

मसीत्यविभक्तिको निर्देशः । इकार उच्चारणार्थः । मसित्ययमिकारान्तपरस्मैपदविशिष्टः स्यात् । मस इगागमः स्यादिति यावत् । 'नमो भरन्त एमसि'। 'त्वमस्माकं तव स्मसि' । इमः स्म इति प्राप्ते ।

3568. The Personal ending *mas* becomes in the Chhandas *masi* ending with an *i*.

Thus नमो भरन्त एमसि (Rig Ved. I. 1. 7), for इमः । त्वमस्माकं तव स्मसि (Rig Ved. VIII. 92. 32) for स्मः ॥

The word मसि in the Sûtra is read without any case ending. The इ in it is for the sake of utterance only. "मस्" assumes in the Vedas a form which ends in इ । In other words the augment इक् is added to the affix मस् ॥ The sûtra might have been मस इक् ॥

३५६९ । त्क्वो यक् । ७ । १ । ४७ ।

'दिवं सुपर्णो गत्वाय' ।

3569. In the Chhandas the Absolutive affix 'ktvâ' gets at the end, the augment 'ya.'

Thus दिवं सुपर्णो गत्वाय (Rig Ved. VIII. 100. 8).

३५७० । इष्ट्वीनमिति च । ७ । १ । ४८ ।

क्त्वाप्रत्ययस्य ईनमन्तादेशो निपात्यते । 'इष्ट्वीनं देवान्' । इष्ट्वेति प्राप्ते ।

3570. In the Chhandas the Absolutive 'ishṭvînam' is irregularly used for 'ishṭvâ.'

To the root यज् is added क्त्वा, and the final आ is replaced by ईनम् ॥ As इष्ट्वीनम् देवान् for इष्ट्वा देवान ॥ The च in the sûtra indicates that there are other forms like this, as पीत्वीनम् for पीत्वा ॥

३५७१ । स्नात्व्यादयश्च । ७ । १ । ४९ ।

आदिशब्दः प्रकारार्थः । आकारस्येकारो निपात्यते । 'स्वच: स्नात्वी मलादिव' । 'पीत्वी सोमस्य वावृधे' । स्नात्वा पीत्वेति प्राप्ते ।

3571. 'Snâtvî' &c. are irregularly formed in the Chhandas.

Thus स्नात्वी मलादिव, for स्नात्वा ; पीत्वी सोमस्य वावृधे for पीत्वा ॥ The word आदि 'et cetera' means "of the form of," namely words having the form like 'स्नात्वी, as पीत्वी &c.

३५७२ । आज्जसेरसुक् । ७ । १ । ५० ।

अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात् । देवासः । ब्राह्मणासः ।

3572. After a stem ending in *a* long or short, the affix *as* of the Nom. Pl. gets, in the Chhandas the augment *as* (*asuk*) at the end.

Thus ब्राह्मणासः पितरः सोम्यासः for ब्राह्मणाः and सोम्याः ॥ Rig VI, 75, 10. ये पूर्वासो य उपरासः (Rig X. 15. 2) for पूर्वे and उपरे ॥ So also सुतासः (R. I. 3. 4).

NOTE :—The form जसेः instead of जसः is out of respect for ancient grammarians.

३५७३ । श्रीग्रामण्योश्छन्दसि । ७ । १ । ५६ ।

आमो नुट् । 'श्रीणामुदारो धरुणो रयीणाम्' । 'सूत ग्रामणीनाम्' ।

3573. In the Chhandas after the words 'śrî' and 'grâmaṇî' Gen. Pl. 'âm' gets the augment 'n.'

As श्रीणामुदारो धरुणो रयीणाम् (Rig Ved. X. 45. 5).

NOTE :—This sûtra could be well dispensed with: by I. 4. 5. श्री is optionally a Nadi word in the Genitive plural. We make the option of that sûtra a vya vasthita-vibhâshâ, by saying श्री is *always* Nadi in the Vedas, and *optionally* every where else. As regards सूत ग्रामणीनाम्. we have सूताश्च ग्रामण्यश्च सूतग्रामण्यः, the Genitive Pl. of which by VII. 1. 54 will be सूतग्रामणीनाम्, ॥

The necessity of this sûtra will, however, arise if the compound be सूताश्च ते ग्रामण्यश्च सूतग्रामण्यः ॥

३५७४ । गोः पादान्ते । ७ । १ । ५७ ।

'विद्मा हि त्वा गोपतिं शूर गोनाम्' । 'पादान्ते' किम् । 'गवां शता पृक्षयामेषु' । पादान्तेऽपि क्वचिन्न । छन्दसि सर्वेषां वैकल्पिकत्वात् । 'विराजं गोपतिं गवाम्' ।

3574. After *go*, when standing at the end of a Rik verse, the augment *na* comes before the Gen. Pl. âm.

As विद्माहि त्वा गोपतिं शूरगोनाम् (Rig Ved. X. 47. 1); but गवां गोत्रमुदसृजो यदङ्गिरः in the beginning of a Pâda. "All rules have exceptions in the Vedas" is an established maxim, so at the end of a Pâda, sometimes this rule does not apply, as हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् । गवां शता पृक्षयामेषु (Rig Ved. I. 122. 7).

३५७५ । छन्दस्यपि दृश्यते । ७ । १ । ७६ ।

अस्थ्यादीनामनङ् । 'इन्द्रो दधीचो अस्थभिः' ।

3575. In the Chhandas also, the stems asthi, dadhi, *sakthi* and *akshi* are found to take the substitute *anan* before endings other than those mentioned in VII. 1. 75 S. 322.

Thus the substitute is ordained before endings beginning with a vowel. In the Vedas it comes before affixes beginning with a consonant. As इन्द्रो दधीचो अस्थभिः (Rig Ved. I. 84. 13).

३५७६ । ई च द्विवचने । ७ । १ । ७७ ।

अस्थ्यादीनामित्येव । 'अक्षीभ्यां ते नासिकाभ्याम्' ।

3576. The acutely accented 'î' is substituted for the final of asthi, dadhi, sakthi and akshi, in the Chhandas, when the case-affixes of the dual follow.

As अक्षीभ्यां ते नासिकाभ्याम् ॥ (Rig. ved. X. 163. 1). In अक्षी the augment नुम् is not added to the stem before the vowel-beginning ending, because VII. 1. 73, which ordained नुम्, is superseded by the present sûtra, and being once superseded, it is superseded for good. (सकृद् गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव) ॥

३५७७ । दृक्स्ववःस्वतवसां छन्दसि । ७ । १ । ८३ ।

एषां नुमस्यात्सौ । 'कीदृङ्ङिन्द्रः' । स्ववान् । स्वतवान् । 'उदोष्ठ्यपूर्वस्य' (२४९४) ।

3577. दृश, स्ववस and स्वतवस take the augment *num* before the affix su (Nominative and Vocative Singular) in the Vedas.

Thus ईदृङ्, तादृङ् यादृङ्, सदृङ्, स्ववान् स्वतवान्, ॥ The श् of ईदृश् (formed by III. 2. 60), is elided by VIII. 2. 23; and ङ् substituted for न् by VIII. 2. 62. The lengthening in स्ववान् and स्वतवान् is through VI. 4. 14.

कीदृङ्ङिन्द्र (Rig. Ved. X. 108. 3).

For स्ववान् see Rig, Ved. I. 35. 10; III. 54, 12, VI. 47. 12;

For स्वतवान् see Rig Ved. IV. 2. 6.

By VII. 1. 102 S 2494 उर् is substituted for the final long ॠ of a root when it is preceded by a labial consonant belonging to the root. In the Vedas how ever, there is diversity.

३५७८ । बहुलं छन्दसि । ७ । १ । १०३ ।

ततुरिः । जगुरिः । पपुरिः ॥

3578. In the Chhandas, the *ur* substitution for 'ṛi' of a root-stem is diverse.

That is, it takes place even when the preceding letter is not labial, and does not take place even when the letter is labial. Thus ततुरिः (Rig Ved. I. 145. 3) दूरे ह्यध्वा जगुरिः, and पपुरिः from तॄ, गॄ and पॄ ॥ All these words ततुरि, जगुरि and पपुरिः are formed by the affix किन् (III. 1. 171).

३५७९ । ह्रु ह्वरेश्छन्दसि । ७ । २ । ३१ ।

ह्वरेर्निष्ठायां, 'ह्रु'आदेशः स्यात् । 'अह्रुतमसि हविर्धानम्' ।

3579. *Hru* is substituted for *hvar* (Bhvâdi 978) in the Chhandas before the Participial-affix.

As ह्रुतस्य चाह्रुतस्य च, अह्रुतमसि हविर्धानम् (Vaj San. 1. 9). But ह्वृतम् in the classical literature.

३५८० । अपरिह्वृताश्च । ७ । २ । ३२ ।

पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते । 'अपरिह्वृताः सनुयाम वाजम्' ।

3580. The word 'aparihvṛitâḥ is irregularly formed in the Chhandas.

The ह्रु substitution required by the last sûtra, does not take place here. As अपरिह्वृताः सनुयाम वाजम् (Rig I. 100. 19). The word being found in the plural number in the Vedas, it is so shown in the sûtra also.

३५८१ । सोमे ह्वरितः । ७ । २ । ३३ ।

इड्गुणौ निपात्येते। 'मा नः सोमो ह्वरितः'।

3581. *Hwaritah* is irregularly formed from *hvri* in the Chhandas, by guna substitution and 'iṭ' augment, when it refers to Soma.

As मा नः सोमो ह्वरितो, विह्वरितस्त्वम्।

३५८२। ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरिति(क्षमिति)वमित्यमितीति च। ७। २। ३४।

अष्टादश निपात्यन्ते। तत्र 'ग्रसु' 'स्कम्भु' 'स्तम्भु' एषामुदित्त्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इण्णिपात्यते। 'युवं शचीभिर्ग्रसिताममुञ्चतम्'। 'विष्कभिते अजरे'। 'येन स्वः स्तभितम्'। 'सत्येनोत्तभिता भूमिः'। स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य मा भूदिति।

'चते याचने'। 'कस गतौ'। आभ्यां क्त इडभावः। 'चत्ता इतश्चत्तामुतः'। 'त्रिधा ह श्यावमश्विना विकस्तम्' 'उत्तानाया हृदयं यद्विकस्तम्'। निपातनबहुत्वापेक्षया सूत्रे बहुवचनं विकस्ता इति तेनैकवचनान्तोऽपि प्रयोगः साधुरेव।

'शसु' 'शंसु' 'शासु' एभ्यस्तृच इडभावः। 'एकस्त्वष्टुरश्वस्याविशस्ता'। 'ग्रावग्राभ उत शंस्ता'। 'प्रशास्ता पोता'।

तरतेर्वृञश्चोत्तरस्य तृच 'उट्' 'ऊट्' एतावागमौ निपात्येते। 'तरुतारं रथानाम्'। तरूतारम्। वरुतारम्-वरूतारम्। 'वरूत्रीभिः सुशरणो नो अस्तु'। अत्र ङीबन्तनिपातनं प्रपञ्चार्थम्। वरूत्रीशब्दो हि निपातितः। ततो ङीपा गतार्थत्वात्।

उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते। 'ज्वल दीप्तौ'। 'क्षर संचलने'। 'टुवमु उद्गिरणे'। 'अम गत्यादिषु'। इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्पठन्ति। तत्र 'क्षमूष् सहने' इति धातुर्बोध्यः। भाषायां तु 'ग्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिताः'। विशसिता-शंसिता-शासिता। तरीता-तरिता। वरीता-वरिता। उज्ज्वलति। क्षरति। पाठान्तरे क्षमति। वमति। अमति।

3582. In the Chhandas, the following irregular forms are found, some with, and some without the augment 'iṭ'—1 grasita, 2 skabhita, 3 stabhita, 4 uttabhita, 5 chatta, 6 vikastâḥ, 7 viśastṛi, 8 śanstṛi, 9 śâstṛi, 10 tarutṛi, 11 tarûtṛi, 12 varutṛi, 13 varûtṛi, 14 varûtrîḥ, 15 ujjvaliti, 16 kshariti, (17 kshamiti,) 18 vamiti and 19 amiti.

Of the above nineteen words, 1, 2, 3, and 4 are from roots ग्रसु 'to swallow' (I. 661) स्कम्भु 'to stop' (I. 414) and स्तम्भु (I. 413) all having an indicatory उ, and therefore by VII. 2. 56 read with VII. 2. 15, their Nishṭhâ would not have taken इट्॥ Thus युवं शचीभिः ग्रसिता (ver. ग्रस्त) ममुञ्चतम् Rig Ved. X. 39. 13. विष्कभिते अजरे (Rig Veda VI. 70. 1) (= विष्कब्धः); येन स्वः स्तभितम् (Rig Ved. X. 121. 5) (= स्तब्धम्), ॥ सत्येनोत्तभिता भूमिः (= उत्तब्धः) Rig Ved. X. 85 1. the irregularity is only with the preposition उत्, with other prepositions, the form स्तभित is not employed.

Similarly (5) चत्ता (= चतिता) as in चत्तो इतश्चत्तामुतः (Rig Ved. X. 155. 2,) from चते याचने। (6) त्रिधाहश्यावमश्विना विकस्तम् (Rig Veda I. 117. 24). उत्तानाया हृदयं यद् विकस्तम्। (=विकसितम्) The word vikastâḥ generally occurs in the plural and is therefore so shown in the Sûtra. But the singular is also valid.

The forms, 7, 8, and 9 are from the roots शसु हिंसायाम and शंसु स्तुतौ, and शासु अनुशिष्टौ with the affix तृच and no augment; as एकस्त्वष्टुरश्वस्याविशस्ता (Rig

Veda I. 162. 19) (= विशसिता), उत शंस्ता सुविप्रः (Rig Veda I. 162. 5) (= शंसिता), प्रशास्ता पोता (Rig Veda I. 94. 6). (= प्रशासितृ) ॥

The forms 10, 11, 12, 13 and 14 are from the roots तॄ and वृ (वृङ् and वृञ्) with the affix तृच and the augment उट् and ऊट् ॥ As तरुतारं or तरूतारं रथानाम् Rig Veda X. 178. 1. (= तरितारम् or तरीतारम्), वरुतारम् or वरूतारम् रथानाम् (= वरितारम् or वरीतारम्); वरूत्रीभिः सुशरणो नो अस्तु (Rig Veda VII. 34. 22). वरूत्रीः is exhibited in this form of Nom pl. of the feminine वरूत्री merely for the sake of showing one form in which it is found: another form is अङ्गोग्नाःत्रि वेदवरूत्रयः । Here the plural is formed irregularly, by taking the word as वरूत्रि ॥ The feminine form could have been easily obtained from वरूतृ, by adding ङीप्, the special mention is explanatory. The rest 15, 16, 17, 18 and 19 are from उत्-ज्वल, क्षर्, क्षम्, वम् and अम्, formed with the vikaraṇa शप् and the affix of the 3rd Per. Sing. तिप्, ईट् being substituted for अ of शप्, or शप् is elided and the augment ईट् is added ॥ As अग्निरुज्ज्वलिति (= उज्ज्वलति), स्तोमं क्षमिति (= क्षमति), स्तोकं क्षरिति (= क्षरति), यः सोमं वमिति (= वमति), अभ्यमिति वरुणः (= अभ्यमति) ॥ Sometimes we have अभ्यमीति, as रावणमभ्यमीति ॥

We should read here again VII. 2. 64. S. 2527.

३५८२ क ॥ बभूथाततन्थजगृम्भववर्थेति निगमे । ७ । २ । ६४ ।

विद्मा तमुत्सं यत आबभूथ'। 'येनान्तरिक्षमुर्वाततंथ'। 'जगृम्भा ते दक्षिणमिन्द्र हस्तम्'। त्वं ज्योतिषा वितमो ववर्थ'। भाषायां तु । बभूविथ। आतेनिथ। जगृहिम । ववरिथेति ।

3582A. In the Nigama (Veda) are found the irregular forms बभूथ, आततन्थ, जगृम्भ and ववर्थ ॥

As, विद्मा तमुत्सं यत आ बभूथ । येनान्तरिक्षमुर्वा ततन्थ (Rig Veda, III. 22. 2), जगृम्भा ते दक्षिणमिन्द्र हस्तम् (Rig Veda X. 47. 1). त्वं ज्योतिषा वितमो ववर्थ ।

In the classical literature, we have बभूविथ, आतेनिथ, जगृहिम and ववरिथ respectively.

३५८३ । ससनिंससनिवांसम् । ७ । २ । ६९ ।

सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसोरिट्। एत्वाभ्यासलोपाभावश्च निपात्यते ।

'* पावकादीनां छन्दसि *' प्रत्ययस्थात्कादित्वं नेति वाच्यम्। 'हिरण्यवर्णाः शुचयः पावकाः' ।

3583. The form *sasanivāṅsam* with *sanin* is irregularly formed.

This is derived from सनोति or सनति root with the affix Kvasu. As अग्ने स्त्वागने सनिं ससनिवांसम् ॥ The augment इट् is added, there is no change of अ of सन्- to ए, nor the elision of the reduplicate before वस् ॥ The other form is सेनिवांसम् when not preceded by सनिम् ॥ This form ससनिवांसम् is Vedic, in the classical literature we have सेनिवांसम् ॥

Várt :—The feminine of पावक &c. in the Vedas does not take इ for अ ॥ As हिरण्यवर्णाः शुचयः पावकाः, यासु अ लोमकाः; अलकाः &c. But पाविकाः, अलोमिकाः in the classical literature. (See VII. 3. 45. S. 461).

३५८४ । घोर्लोपो लेटि वा । ७ । ३ । ७० ।

'दधद्रत्नानि दाशुषे'। 'सोमो ददद्गन्धर्वाय'। 'यदग्निरग्नये ददात्'।

3584. The final of 'dâ' and 'dhâ' ('ghû roots) may optionally be elided in the Subjunctive 'leṭ'.

As दधद्रत्ना दाशुषे (Rig. I. 35. 8.) सोमो ददद् गन्धर्वाय (Rig. X. 85. 41.) But also यदग्निरग्नये ददात् ॥

३५८५ । मीनातेर्निगमे । ७ । ३ । ८१ ।

शिति ह्रस्वः । 'प्रमिणन्ति व्रतानि' । लोके प्रमीणाति । 'अस्तिसिचोऽपृक्ते' (२२२५) ।

3585. In the Chhandas 'mî' is shortened before a 'śit' affix.

As प्रमिनन्ति व्रतानि (Rig. X. 10. 5.) The न becomes ण (प्रमिणन्ति according to Kâśika) by VIII. 4. 15. Why in the Chhandas ? Observe प्रमीणाति ॥

By VII. 3. 96. S. 2225 a single consonantal sârvadhâtuka affix gets the augment ईट्, after अस् (अस्ति) and after the Aorist character सिच् ॥ But in the Chhandas, there is diversity.

३५८६ । बहुलं छन्दसि । ७ । ३ । ९७ ।

'सर्वमा इदम्' ।

अस्तेर्लङ् तिप् ईडभाव अपृक्तत्वाद्धल्ङ्यादिलोपः । रुत्वविसर्गौ । संहितायां तु 'भोभगो – (१६७) इति यत्वं । 'लोपः शाकल्यस्य' (६७) इति यलोपः । गोभिरक्षाः रक्षपालने' लुङ् । 'अतोल्रान्तस्य' (२३३०) इति वृद्धिः । इडभावश्छान्दसः । अद् शेषं पूर्ववत् ॥

ह्रस्वस्य गुणः' (२४२) । 'जसि च' (२४१) । '+ जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः +' । 'अधा शतक्रत्वो यूयम्' शतक्रतवः । 'पश्वेनृभ्यो यथा गवे' । पशवे । 'नाभ्यस्तस्याचि–' (२५०३) इति निषेधे । '+ बहुलं छन्दसीतिवक्तव्यम् +' । 'आनुषग्जुजोषत्' ।

3586. In the Chhandas, a single consonantal Sârvadhâtuka affix gets diversely the augment 'îṭ' after *as* and *sich* ॥

As आप एवेदं सलिलं सर्वमाः ॥ Here आः is used instead of आसीत् ॥

NOTE :—आः is thus evolved. अ+अस्+लङ् + तिप् । The ई that would have come by S. 2225 does not come. So we have अ + अस्+त् = आस् (the final consonant त् is elided by VI. 1. 68. S. 252). Then the स् is changed to रु and then रु to visarga : and we have आर् । Then in sanhita, the visarga or रु is changed to य by VIII. 3. 17 S. 167. and we get आय् ॥ Then this य् is elided by VIII. 3. 19 S. 67, and so we have सर्वम् आ इदम् ॥

Similarly in गोभिरक्षाः । It is the aorist (लुङ्) of रक्ष् 'to protect.' The Vriddhi takes place by S. 2330. The absence of इट् is the Vaidic irregularity.

By VII. 3. 108, a guṇa is substituted for short इ and उ in the Vocative Singular, and also in the Nominative Plural by VII. 3. 109. The following Vârtika makes an exception to these as well as the other rules of the third chapter of the Seventh Book from sûtra 108 downwards.

Vârt :—All these rules up to the end of this (7th Book, 3rd) chapter are of optional application in the Vedas. As अम्बे or अम्ब, पूर्णा दर्वि or पूर्णा दर्वी, अधा शतक्रत्वः (Rig Veda X. 97. 2) or शतक्रतवः पश्वे नृभ्यो यथागवे (Rig Veda I. 43. 2) or पशवे, नृभ्यः, किकिदीव्या, किकिदीविना ॥

By VII. 3. 87 the guṇa is not substituted for the penultimate short इ, उ ऋ in the reduplicated form of a root, before a Sârvadhâtuka affix beginning with

a vowel and having an indicatory ङ ॥ The following Vârtika makes an exception.

Vârt:—There is diversity in the Vedas. As अनुषक् जुजोषन् (Rig Veda III. 4. 10) the लेट् of जुष् ॥

३५८७ । नित्यं छन्दसि । ७ । ४ । ८ ।

छन्दसि विषये चङ्युपधाया ऋवर्णस्य ऋकारः नित्यम् । अवीवृधत् ।

3587. Short ऋ is invariably substituted in the Chhandas for the penultimate ऋ or ॠ of a Causative stem, in the Reduplicated Aorist.

As अवीवृधत् (Rig Veda VIII. 8. 8) अवीवृधताम्, अवीवृधन् ॥

३५८८ । न छन्दस्यपुत्रस्य । ७ । ४ । ३५ ।

पुत्रभिन्नस्यादन्तस्य क्यचि ईत्वदीर्घौ न । मित्रयुः । 'क्याच्छन्दसि' (३१५०) इति उः । 'अपुत्रस्य' किम् । 'पुत्रीयन्तः सुदानवः' ।

'+ अपुत्रादीनामिति वाच्यम् +' । 'जनीयन्तोऽन्वग्रवः' । जनमिच्छन्तोऽत्यर्थः ।

3588. In the Chhandas the rules causing lengthening, or the substitution of long 'î' for the final vowel of the stem before the affix kyach, do not apply, except in the case of *putra.*

Thus मित्रयुः, संस्वेदयुः, देवाञ् जिगाति सुम्नयुः ॥ But पुत्रीयन्तः सुदानवः (Rig. VII. 96. 4.)

Vârt:—It should be rather stated पुत्र and the rest: as जनीयन्तोऽन्वग्रवः ॥ See III. 2. 170, for the affix उ ॥

३५८९ । दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति । ७ । ४ । ३६ ।

एते क्यचि निपात्यन्ते । भाषायां तु उप्रत्ययाभावाद्दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति ।

3589. In the Chhandas दुरस्यु, द्रविणस्यु, वृषण्यति and रिषण्यति are irregularly formed.

As अविष्योना दुरस्युः, (= दुष्टीयति with the affix असुक् added to दुष्ट), द्रविणस्यु विपन्यया (द्रविणीयति, here द्रविणस् is substituted for द्रविण similarly). वृषण्यति = वृषीयति (वृषण् substituted for वृष) ॥ रिषण्यति = रिष्टीयति (रिषण् substituted for रिष्ट)॥

३५९० । अश्वाघस्यात् । ७ । ४ । ३७ ।

'अश्व' 'अघ' एतयोः क्यच्यात्स्याच्छन्दसि । 'अश्वायन्तो मघवन्' । 'मा त्वा वृका अघायवः' । 'न च्छन्दसि-' (३५८८) इति निषेधो नेत्वमात्रस्य । किंतु दीर्घस्यापीति । अत एव सूत्रं ज्ञापकम् ।

3590. In the Chhandas, long 'â' is substituted for the final of aśva and *agha,* before the Denominative *kyach.*

As अश्वायन्तो मघवन् (Rig. VII. 32. 23), मा त्वा वृका अघायवो विदन् ॥ This also indicates that other words do not lengthen their vowel in the Vedas before क्यच्, as taught in VII. 4. 35. S. 3588. See Vârtika to III. 1. 8. The word अघायु occurs in Rig. I. 120. 7, 27; 3.

३५९१ । देवसुम्नयोर्यजुषि काठके । ७ । ४ । ३८ ।

अनयोः क्यचि आत्स्याद्यजुषि कठशाखायाम् । 'देवायन्तो यजमानाः' । 'सुम्नायन्तो हवामहे' । इह यजुःशब्दो न मन्त्रमात्रपरः किं तु वेदोपलक्षकः । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति । किं च ऋग्वेदेऽपि भवति । यद्येन्मन्त्रो यजुषि कठशाखायां दृष्टः । 'यजुषि' इति किम् । 'देवाञ्जिगाति सुम्नयुः' । बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणमिति हरदत्तः ।

3591. The long 'â' is substituted for the final of *deva* and *sumna* before the Denominative *kyach* in the Yajush Kâṭhaka.

As देवायन्तो यजमानाः सुम्नायन्तो हवामहे । Why in the Yajus? Observe देवाञ्जिगाति सुम्नयुः । According to Haradatta the author of Padamanjari, this counter example is taken from the Kaṭha Shâkhâ of the Rig Veda, for the Rig Veda also has a Kaṭha Shâkha. Why do we say in the Kâṭhaka? Observe सुम्नयुरिदमाशात् ।

In this sûtra, Yajush is not confined merely to the Mantra, but means the Veda in general. Therefore the rule will apply to a Mantra of the Rig Veda also, if it is found in the Yajur Veda. That is, the rule will apply to a Mantra of the Rig Veda also, in the Rig Veda, if it be such a Mantra which is common to the Rig and Yajur Veda Kaṭha Shâkhâ.

३५९२ । कव्यध्वरपृतनस्यर्चि लोपः । ७ । ४ । ३९ ।

'कवि' 'अध्वर' 'पृतना' एषामन्त्यस्य लोपः स्यात्क्यचि परे ऋचिविषये । 'स पूर्वया निविदा कव्यतायोः' । 'अध्वर्युं वा मधुपाणिम्' । 'दमयन्तं पृतन्यून्' । 'दधातेर्हिः' (३०७६) । जहातेश्च क्त्वि (३३३१) ।

3592. In the Rig Veda, the final of कवि, अध्वर and पृतना is dropped before the Denominative क्यच् ।

स पूर्वया निविदा कव्यतायोः (Rig. I. 96. 2). अध्वर्युं वा मधुपाणिम् (Rig Veda X. 41. 3), दमयन्तमपृतन्यून् (Rig Veda X. 74. 5).

By VII. 4. 42. S. 3076 हि is substituted for the धा of दधाति before an affix beginning with त् and having an indicatory क् । By VII. 4. 43, S. 3331 हि is substituted for the हा of जहाति before क्त्वा । But in the Vedas there is diversity

३५९३ । विभाषा छन्दसि । ७ । ४ । ४४ ।

'हित्वा शरीरम्' । हीत्वा वा ।

3593. *Hi* is optionally substituted for 'hî' before 'ktvâ' in the Chhandas.

As हित्वा शरीरं यातव्यं, or हीत्वा also. The long ई of VI. 4. 62 does not take place also as a Vedic irregularity.

३५९४ । सुधितवसुधितनेमधितधिष्वधिषीय च । ७ । ४ । ४५ ।

'सु' 'वसु' 'नेम' एतत्पूर्वस्य दधातेः क्ते प्रत्यय इत्त्वं निपात्यते । 'गर्भं माता सुधितं वक्षणासु' । वसुधितमग्नौ । नेमधिता न पौंस्या । 'क्तिन्यपि दृश्यते' । 'उत श्वेतं वसुधितिं निरेके' । धिष्वावज्रं दक्षिण इन्द्र हस्ते' । धत्स्वेति प्राप्ते । 'सुरेता रेतो धिषीय' । आशीर्लिङ् । इट् । 'इटोऽत्' (२२५१) धासीयेति प्राप्ते । 'अपो भि' (४४२) ।

'+ मासश्छन्दसीति वक्तव्यम् +' । माद्भिः शरद्भिः । 'स्ववः स्वतवसोरुषसश्चेष्यते' । स्वतवद्भिः । अवतेरसुन् । शोभनमवो येषां ते स्ववसस्तैः । 'तु' इति सौत्रो धातुस्तस्मादसुन् । स्वं

त्रो येषां ते स्वतवद्भिः । 'समुषद्भिरजायथाः' । 'मिथुनेऽसिः । 'वसेः किच्च' इत्यसिप्रत्यय इति हरदत्तः । पञ्चपादीरीत्या तु 'उषः कित्' इति प्राग्व्याख्यातम् । 'न कवतेर्यङि' (२६४१) ।

3594. The following five Vedic forms are irregularly formed, namely सुधित, वसुधित, नेमधित, धिष्व and धिषीय ॥

Of these five, सुधित, वसुधित and नेमधित are formed from the root धा with the affix क्त, preceded by सु, वसु and नेम ॥ As गर्भं माता सुधितम् (Rig Veda X. 27. 16). (=सुहित ;), ॥ वसुधितमग्नौ जुहोति (=वसुहितं). The word वसुधितं is a Karmadhâraya compound, according to Haradatta. In the Veda-Bhâsya it is explained as वसूनां धातारं प्रदातारम् ॥ The form वसुधिति with क्तिन् is also found in the Vedas. As :—उतश्वेतं वसुधितिं निरेके (Rig Veda VII. 90. 3). नेमधिता न पौंस्या (Rig Veda X. 93. 13) (=नेमहिता) ॥ नेम् means 'half.' धिष्व is Imperative 2nd Per. Sg. of धा, there is no reduplication, as धिष्व सोमम् = धत्स्व ॥ धिष्व वज्रम् हस्त आदक्षिणत्राभिः (Rig Veda VI. 18. 9). धिषीय is Benedictive Atmanepada 1st Per. Sg. of धा, the regular form being धासीय ॥ See III. 4. 106.

By VII. 4. 48. S. 442, त् is substituted for the final of the stem अप् before a case-ending beginning with भ ॥ In the Vedas this substitution takes place in the case of मास &c.

Vârtika:—The त् substitution takes place in the Chhandas for the final of मास &c. Thus माद्भिः, शरद्भिः ॥ मास becomes मास् by VI. 1. 63.

Ishti :—The त् substitution should take place, according to Patanjali, after स्ववस्, स्वतवस् and उषस् also. As स्ववद्भिः । स्ववस् is derived from अव् 'to protect,' with the affix असुन् and the prefix सु ॥ It means 'he whose protection is good.' See Rig Veda I. 35, 10; &c.

The word स्वतवस् is derived from the root तु with the affix असुन् and Prefix स्व ॥ It means धनवान् or wealthy. As स्वतवद्भिः । See S. 3633. Similarly उषद्भिः as in समुषद्भिः अजायथाः (Rig Veda I. 6. 3).

This word is formed by the affix असि which is treated as कित् after वस् (See Uṇâdi IV. 222 and 233). This is according to the opinion of Haradatta, who follows evidently the lost Uṇâdi Sûtras which consisted of Ten Padas. In the present Uṇâdi Sûtra of Five Padas we have उषः कित् and not वसेः कित् ॥ वसति सूर्येण सह इति उषा ॥

By VII. 4. 63. S. 2641, the Palatal is not substituted for the Guttural of the reduplicate of कु (कवते) in the Intensive. In the Vedas this prohibition applies to the root कृष् also.

३५९५ । कृषेश्छन्दसि । ७ । ४ । ६४ ।

यङ्यभ्यासस्य चुत्वं न । करीकृष्यते ।

3595. The Palatal is not substituted for the Guttural of the reduplicate of 'kṛish' in the Chhandas, when in the Intensive.

As करीकृष्यते यज्ञकुणपः ; otherwise चरीकृष्यते कर्षीबलः ॥

३५९६ । दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च । ७ । ४ । ६५ ।

एतेऽष्टादश निपात्यन्ते । आद्यास्त्रयो धृङो धारयतेर्वा ।
भवतेर्यङ्लुगन्तस्य गुणाभावः । तेन भाषायां गुणो लभ्यते ।
तिजेर्यङ्लुगन्तात्तङ् । ऋच्छतेर्लटि हलादिः शेषापवादो रेफस्य लत्वमित्त्वाभावश्च निपात्यते ।
'अलर्षि युध्म खजकृत्पुरन्दरः' । शिपा निर्देशो न तन्त्रम् । अलर्ति दक्ष उत' ।
फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीगागमो निपात्यते । 'अन्वापनीफणत्' ।
स्यन्देः संपूर्वस्य यङ्लुकि शतर्यभ्यासस्य निक् । धातुसकारस्य षत्वम् ।
करोतेर्यङ्लुगन्तस्याभ्यासस्य चुत्वाभावः । 'करिक्रत्' ।
क्रन्देर्लुङि च्लेरङ् द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च । 'कनिक्रदज्जनुषम्' । अक्रन्दीदित्यर्थः ।
'बिभर्तेरभ्यासस्य जश्त्वाभावः । 'वि वो भरिभ्रदोषधीषु' ।
ध्वरतेर्यङ्लुगन्तस्य शतर्यभ्यासस्य विगागमो धातोर्ऋकारलोपश्च । 'दविध्वतो रश्मयः सूर्यस्य' ।
द्युतेरभ्यासस्य संप्रसारणाभावोऽत्त्वं विगागमश्च । 'दविद्युतद्दीद्यच्छोशुचानः' ।
तरतेः शतरि श्लावभ्यासस्य रिगागमः । सहोजा तरित्रतः' । सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य ।
वृजेः शतरि श्लावभ्यासस्य रीक् ।
मृजेर्लिटि णलभ्यासस्य रुक् धातोश्च युक् । गमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च । 'वक्ष्यन्ती वेदा गनीगन्ति कर्णम्' ।

3596. In the Chhandas are found the following eighteen irregularly reduplicated forms:—1 dâdharti, 2 dardharti, 3 dardharshi, 4 bobhûtu. 5 tetikte, 6 alarshi, 7 â panîphaṇat, 8 sam sanishyadat 9 karikrat' 10 kanikradat, 11 bharibhrat, 12 davidhvataḥ, 13 davidyutat, 14 taritrataḥ, 15 sarîsṛpatam, 16 varîvṛjat, 17 marmṛjya and 18 â ganîganti.

The word छन्दसि is drawn in to this sûtra, by force of च ॥ The from दाधर्ति, is either from the Causative of the root धृङ् अवस्थाने or from धृञ् in the श्लु or यङ् लुक्, there is lengthening of the abhyâsa and elision of णिच् ॥ (2) So also दर्धर्ति is the form in ślu, with रुक् augment of the abhyâsa. (3) दर्धर्षि if it be a form of यङ् लुक्. there is no irregularity. (4) बोभूतु. is from भू in the Intensive (यङ् लुक्) Imperative, irregularly without guṇa (6) अलर्षि is form the root ऋ (ऋच्छति) in Present, 2nd Person, the ऋ of abhyâsa is not elided, though required by VII. 4. 60, and this ऋ is changed to ल irregularly. This form is found in the 3rd Person also, as अलर्ति दक्षः ॥ अलर्षि युध्म खजकृत्पुरंदरः (Rig Veda VIII 1. 7). अलर्ति दक्ष उत (Rig Veda VIII. 48. 8). (7) आ पनीफणत् is from फण् with आ augment and शतृ affix is added to यङ् लुक्, and in the reduplicate नी is added. (8) संसनिष्यदत् is from स्यन्द with the Preposition सम्, in the Intensive yaṅ luk, with शतृ affix, नि being added in the abhyâsa, the root स is changed to ष ॥ The Preposition सं is not absolutely necessary, with other Prepositions also we have this form' as आ सनिष्यदत् ॥ (9) करिक्रत is from कृ (करोति), in the Intensive yaṅ luk, with शतृ, in the abhyâsa there is no palatal change (VII. 4. 62). and रि is added to the reduplicate. (10) कनिक्रदत् from क्रन्द in the Aorist with अङ् reduplication, there is no chutva (VII. 4. 62) of the reduplicate, and the augment नि is added. In the classical literature, the form is अक्रन्दीत् ॥ कनिक्रदज्जनुषं (Rig Veda II. 4. 4). (11) भरिभ्रत् from भृ (बिभर्ति) in yaṅ luk with शतृ, without ज of VII. 4. 76,

without jaśtva, and रि is added to the reduplicate. विश्वा भरिभ्रदोषधीषु (Rig Veda II. 4. 4). (12) दविध्वतः from ध्वृ (ध्वरति) in the yaṅ luk, śatṛi, plural number Nominative. The वि is added to the reduplicate, the ऋ is elided, दविध्वतः रश्मयः सूर्यस्य ॥ (Rig Veda IV. 13. 4.) (13) दविद्युतत् is from dyut, yaṅ luk with śatṛ, there is no vocalisation of the reduplicate, with त change and वि augment. (14) तरित्रतः from तॄ (तरति) with ślu śatṛ, genitive singular: and रि added to abhyâsa. सहोर्जा तरित्रतः (Rig Veda IV. 40. 3). (15) सरीसृपत् from सृप् with ślu śatṛ, Accusative with री added to abhyâsa. (16) वरीवृजत् from वृज् with ślu, śatṛ and री augment. (17) मर्मृज्म from मृज् with लिट् (Perfect) णल्, र added to abhyâsa, and अ added to the root, and there is no vṛiddhi, because there is no short penultimate now. In fact VII. 2. 114 is to be qualified by the words लघूपध from VII. 3. 86. (18) आ गनीगन्ति is from गम् with the Preposition आ, in the Perfect, with ślu, there is no chutva (VII. 4. 62), and augment नी is added. वक्ष्यन्ती वेदा गनीगन्ति कर्णम् ॥ (Rig Veda VI. 75. 3).

The word इति in the aphorism indicates that other forms, similar to these, are also to be included.

३५९७ । ससूवेति निगमे । ७ । ४ । ७४ ।

सुतेर्लिटि परस्मैपदं गुणाभावोऽभ्यासस्य चात्वं निपात्यते। 'गृष्टिः ससूव स्थविरम्'। सुषुव इति भाषायाम् ।

3597. In the Chhandas sasûva is irregularly formed in the Perfect.

It is derived from सू । Thus गृष्टिः ससूव स्थविरं otherwise सुषुवे । Rig Veda IV. 18. 10.

३५९८ । बहुलं छन्दसि । ७ । ४ । ७८ ।

अभ्यासस्येकारः स्याच्छन्दसि । 'पूर्णां विवष्टि'। वशेरेतद्रूपम् ।

3598. 'I' is diversely substituted in the Chhandas for the vowel of the reduplicate, in the Reduplicated Present-form.

As पूर्णां विवष्टि (from वश्).

इति सप्तमोऽध्यायः ।

CHAPTER VIII.

३५९९ । प्रसमुपोदः पादपूरणे । ८ । १ । ६ ॥

एषां द्वे स्तः पादपूरणे । 'प्रप्रायमग्निः' । 'संसमिद्युवसे' । 'उपोप मे परामृश' । 'किं नोदुदु हर्षसे' ।

3599. *Pra, sam, upa,* and *ut* are repeated, when by so doubling, the foot of a verse is completed.

As प्र प्रायमग्निर्भरतस्य शृण्वे (Rig. VII. 8. 4), संसमिद्युवसे वृषन् । (Rig Veda X. 191. 1). उपोप मे परामृश (Rig Veda I. 126. 7), किं नोदुदु हर्षसे दातवा उ (Rig Veda IV. 21. 9).

३६०० । छन्दसीरः । ८ । २ । १५ ॥

इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात् । 'हरिवते हर्यश्वाय' । गीर्वान् ।

3600. In the Chhandas *v* is substituted for the *m* of *mat*, when the stem ends in *i*, ī or *r*.

As, हरिवते हर्यश्वाय (Rig Veda III. 52. 7). Of the stems ending in र we have गीर्वान् &c.

३६०१ । आनो नुट् । ८ । २ । १६ ॥

अन्नन्तान्मतोर्नुट् स्यात् । 'अक्षण्वन्तः कर्णवन्तः' । 'अस्थन्वन्तं यदनस्था बिभर्ति' ।

3601. The affix *mat* gets the augment 'nuṭ' in the Chhandas, after a stem ending in *an*.

As अक्षण्वन्तः कर्णवन्तः सखायः (Rig Veda X. 71. 7) अस्थन्वन्तंयदनस्था बिभर्ति (Rig Veda I. 164. 4).

३६०२ । नादघस्य । ८ । २ । १७ ॥

नान्तात्परस्य घस्य नुट् । 'सुपथिन्तरः' ।

'+भूरिदाव्नस्तुड्वाच्यः +' । 'भूरिदावत्तरो जनः' ।

'+ ईद्रथिनः + । 'रथीतरः' । 'रथीतमं रथीनाम्' ।

3602. In the Chhandas, the affixes *tar* and *tam* receive the augment nuṭ after a stem in *n*.

The affixes तरप् and तमप् are called घ। Thus सुपथिन् + तर = सुपथि + तर (VIII. 2. 7) = सुपथि + न्तर (VIII. 2. 17) = सुपथिन्तरः ।

Vârt:—The augment तुट् is added to these affixes after भूरिदावन्; as भूरिदावत्तरः (III. 2. 74, the affix is वनिप्) जनः (Rig Veda VIII. 5. 39).

Vârt:—Long ई is the substitute of the final of रथिन् before तर and तम । The word रथिन् is formed by the affix इनि in the sense of मतुप् । The final न् is first elided by VIII. 2. 7, and then for the short इ of रथि the long ई is substituted by the present vârtika. If the long ई were substituted for the final न् of रथिन् as रथिई + तर, then this long ई being asiddha, it could not be compounded by ekâdeśa with the preceding इ into ई and the form would always remain रथिईतरः । As रथीतरः, and रथीतमं रथीनाम् (Rig Veda I. 11. 1). Or this ई may be considered to have come after रथ in the sense of मतुप् ।

३६०३ । नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि । ८ । २ । ६१ ॥

सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठाया नत्वाभावो निपात्यते । 'नसत्तमञ्जसा' । 'निषत्तमस्य चरतः' । असन्नं निषण्णमिति प्राप्ते । उन्देर्नञ्पूर्वस्यानुत्तम् । प्रतूर्तमिति त्वरतेः । तुर्वीत्यस्य वा । सूर्तमिति सृ इत्यस्य । गूर्तमिति गूरी इत्यस्य ।

3603. In the Chhandas we have the following irregular Participles : nasatta, nishatta, anutta, pratûrtta, sûrtta and gûrtta.

The words नसत्त and निषत्त are derived from the root सद् preceded by न and नि, and there is not the न change of VIII. 2. 42. Thus नसत्तमञ्जसा ॥ In the classical iterature we have असन्नम् ॥ So also निषत्तः in the Vedas, as in निषत्तमस्य चरतः (Rig Ved. 1. 146. 1) but निषण्णः in the classical literature. The word अनुत्तः is from उन्द with the negative नञ् ॥ The option of VIII. 2. 56 does not apply here. As अनुत्तमा ते मघवन् (= अनुन्नम्) ॥ प्रतूर्तम् is from त्वर् or तुर्व, as प्रतूर्तं वाजिनम् (= प्रतूर्णम्) ॥ When it is derived from त्वर् then ऊठ् is added by VI. 4. 20 ; and when from

तूर्व, then VI. 4. 21 is applied. तूर्ण is from त्वर, the व is changed to ऊ irregularly; as तूर्णगायः = त्वरितगायः ॥ गूर्त is from गुर् as गूर्त भवतस्य (=गूर्ण) ॥

३६०४ । अम्नरूधरवरित्युभयथा छन्दसि । ८ । २ । ७० ॥

रुर्वा रेफो वा । अम्न एव-अम्न रेव । ऊध एव-ऊधरेव । अव एव-अवरेव ।

3604. In the Chhandas, both *ru* and *ra* are substituted for the final of amnas, ûdhas, and avas.

Thus अम्न एव or अम्न रेव, ऊध एव or ऊधरेव; अव एव or अवरेव ॥ When रु is substituted for the finals, this रु is replaced by य, by VIII, 3. 17, which is elided by VIII. 3. 19. The word अम्नस् means 'a little', and अवस् 'protection.'

३६०५ । भुवश्च महाव्याहृतेः । ८ । २ । ७१ ॥

भुव इति-भुवरिति ।

3605. In the Chhandas, *ru* and *ra* may replace the final of the word 'bhuvas' when used as a mahâ-vyâhriti.

Thus भुवरित्यन्तरिक्षम् or भुव इत्यन्तरिक्षम् ॥ The mahâ-vyâhritis are three-भूः, भुवः and स्वः ॥

३६०६ । ओमभ्यादाने । ८ । २ । ८७ ॥

ओमः प्लुतः स्यादारम्भे । 'ओ३म् अग्निमीळे पुरोहितम्' । अभ्यादाने किम् । ओमित्येकाक्षरं ब्रह्म ।

3606. The vowel in *om* is pluta in the beginning of a sacred text.

The word अभ्यादानं means the commencement of a sacred mantra or vedic text. Thus ओ३म् अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं ॥ (Rig I. 1. 1.).

Why do we say "in the beginning"? Observe ओमित्येतदक्षरमुद्गीथमुपासीत (Chhândogya Upanishad I. 1. 1). Here ओम् is not used to indicate the commencement of a Text or Mantra, but is itself the subject of comment.

३६०७ । ये यज्ञकर्मणि । ८ । २ । ८८ ॥

ये३ यजामहे । 'यज्ञ-' इति किम् । ये यजामहे ।

3607. The vowel of *ye* becomes pluta in a sacred text, when it is employed in a sacrificial work.

Thus ये३यजामहे ॥ Why do we say when employed in a sacrificial work? Observe ये यजामह इति पञ्चाक्षरम् "Ye yajamahe" consists of five syllables. Here it is a simple recitation.

३६०८ । प्रणवष्टेः । ८ । २ । ८९ ॥

यज्ञकर्मणि टेरोमित्यादेशः स्यात् । 'अपां रेतांसि जिन्वतो३म्' । 'टेः' किम् । हलन्त्यस्यैव मा भूत् ।

3608. In a sacrificial work, ओ३म् is substituted for the final vowel, with the consonant, if any, that may follow it, of a sentence.

The word यज्ञकर्मणि is understood here also. The word प्रणव means ओम् ॥ It is the name given to this syllable. This ओम् is substituted for the final letter

(टि) of that word which stands either at the end of a Pâda of a sacred hymn or at the end of a hemistich of such Rik. Thus for अपां रेतांसि जिन्वति (Rig. VIII. 44. 16), we may have अपां रेतांसि जिन्वतो३म् ॥ So also for देवाङ्‌ जिगाति सुम्नयुः (Rig. III. 27. 1), we may have देवाङ्‌ जिगाति सुम्नयो३म् ॥

The word टि is repeated in this aphorism in spite of its anuvritti from VIII. 2. 83, to indicate that ओम् replaces the *whole* of the last syllable, with its vowel and consonant. Had टि not been repeated, then by the rule of अलोऽन्त्यस्य the final *letter* only of the टि portion of a sentence would have been replaced. Thus in सुम्नयुः the visarjaniya alone would have been replaced.

When not employed in connection with sacrificial works, there is no such substitution. Thus in the simple reading of the Vedas, we should always recite अपां रेतांसि जिन्वति ॥

३६०९ । याज्यान्तः । ८ । २ । ९० ॥

ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । 'जिह्वामग्ने चकृषे हव्यवाहा३ म्' । 'अन्तः' किम् । 'याज्यानामवां वाक्यसमुदायरूपाणां प्रति वाक्यं टेः स्यात् । सर्वान्त्यस्य चेष्यते ।

3609. The last vowel at the end of Mantras called Yâjya, when employed in sacrificial works, is pluta and has the Acute.

Thus स्तोमैर्विधेमाग्नये३ (Rig. VIII. 43. 11), जिह्वामग्ने चकृषे हव्यवाहा३म् (Rig. X. 8. 6).

Why do we say 'at the end'? There are some Yâjya hymns, consisting of several sentences. The final vowel (टि) of every sentence would have become pluta, in such a hymn. To prevent it, the word "anta" is used, so that the final vowel of the hymn at the end of all, becomes pluta.

३६१० । ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । ८ । २ । ९१ ॥

एषामादेः प्लुतो यज्ञकर्मणि । 'अग्नयेऽनुब्रू३हि' । 'अग्नये गोमयानि प्रे३ष्य' । 'अस्तु श्रौ३षट्' । 'सोमस्याग्ने वीही३ वौ३षट्' । 'अग्निमा३वह' ।

3610. In a sacrificial work, the first syllable of ब्रूहि, प्रेष्य, श्रौषट् वौषट् and आवह is pluta.

Thus अग्नयेऽनुब्रू३हि (Maitr S. I. 4. 11). अग्नये गोमयानि (or न्) प्रे३ष्य, अस्तु श्रौ३षट्; सोमस्याग्ने वीही३ वौ३षट् अग्निमा३वह ॥

So also in पित्र्यायामनुस्वधा on the analogy of ब्रूहि, so also अस्तुस्वधा ॥ The word वौषट् is illustrative of the six forms वषट्, वौषट्, वाषट्, वौखट्, वाखट् वखट् ॥

But there is no prolation in आवह देवान् यजमानाय; आवह जात वेदः ॥

३६११ । अग्नीत्प्रेषणे परस्य च । ८ । २ । ९२ ॥

अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात्परस्य च । 'ओ३श्रा३वय' । नेह । 'अग्नीदग्नीन्विहर । बर्हि स्तृणीहि' ।

Thus अव्ययः उच्चैर्मुखः । The word उच्चैः is finally acute and retains its accent. दिक्—प्राङ्मुखः । The word प्राक् has acute on the first by VI. 2, 52, गो &c :—

गोमुखः, महामुखः, स्थूलमुखः, मुष्टिमुखः, पशुमुखः, and वत्समुखः। In these the first members of the Bahuvrîhi preserve their respective accents, under Rule VI. 2. 1 and in the case of compounds preceded by गो, मुष्टि, and वत्स, the optional rule taught in the next sûtra is also superseded by anticipation, though the words may denote comparison.

३९०३। निष्ठोपमानादन्यतरस्याम्। ६। २। १६९॥

निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वान्तोदात्तं बहुव्रीहौ। प्रक्षालितमुखः। पक्षे 'निष्ठोपसर्ग–' (३८४४) इति पूर्वपदान्तोदात्तत्वम्। पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति। उपमानम्। सिंहमुखः॥

3903. In a Bahuvrîhi, the word 'mukha' denoting 'an actual mouth,' has optionally the acute on the final, when preceded by a participle in 'ta' or by that wherewith something is compared.

Thus प्रक्षालितमुखः or प्रक्षालितमुखः or प्रक्षालितमुखः। When the final is not acute, then Rule VI. 2. 110 S. 3844 applies which makes the first member have acute on the final optionally; and when that also does not apply, then by VI. 2. 1. the first member preserves its original accent, which is that of the gati (VI. 2. 49). Thus there are three forms. So also with a word denoting comparison:— सिंहमुखः or सिंहमुखः॥

३९०४। जातिकालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्नाः। ६। २। १७०॥

सारङ्गजग्धः। मासजातः। सुखजातः। दुःखजातः। 'जातिकाल–' इति किम्। पुत्रजातः। 'अनाच्छादनात्' किम्। वस्त्रच्छन्नः। 'अकृत–' इति किम्। कुण्डकृतः। कुण्डमितः। कुण्डप्रतिपन्नः। अस्मादेव ज्ञापकान्निष्ठान्तस्य परनिपातः॥

3904. After a word denoting a species with the exception of a word for 'garment or covering', and after a time-denoting word, as well as after 'sukha' &c. the Participle in 'kta' has acute on the final, in a Bahuvrîhi, but not so when the participles are कृत, मित and प्रतिपन्न॥

Thus सारङ्गजग्धः। कालः—मासजातः। सुख &c. :—सुखजातः। दुःखजातः।

Why do we say 'after a Species, a time or सुख &c. word'? Observe पुत्रजातः (II. 2. 37), the participle being placed after the word Putra.

Why do we say 'when not meaning a garment'? Observe वस्त्रच्छन्नः from the root वस् with the affixes ष्ट्रन्.

Why do we say 'when not कृत &c.'? Observe कुण्डकृतः, कुण्डमितः, कुण्डप्रतिपन्नः। कुण्ड is first acute by Phit II. 3. being neuter. These three participles do not stand first in a compound (contrary to II. 2. 36). This sûtra implies that as a special case Nishṭhâ participles may stand second in a compound. In the counter-examples, above given, the first members retain their original accent (VI. 2. 1). The words सुख &c are given under III. 1. 18.

1 सुख, 2 दुःख, 3 तृप्र, (तृप्र नेत्र) 4 कृच्छ्र, 5 अस्र, 6 आस्र, 7 अलीक, 8 प्रतीप, 9 करुण, 10 कृपण, 11 सोढ, 12 गहन.

३९०५ । वा जाते । ६ । २ । १७१ ॥

जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः । दन्तजातः । मासजातः ॥

3905. After a species (with the exception of garment) or a time denoting word, or after 'sukha' &c. in a Bahuvrîhi, the word 'jâta' has optionally acute on the final.

Thus दन्तजात॑ः or द॑न्तजातः, मासजात॑ः or मा॑सजातः, सुखजात॑ः or सु॑खजातः, दुःखजात॑ः or दुः॑खजातः &c. The word दन्त is first-acute by Phit II. 6; मास is first-acute by Phit II. 15. The words सुख and दुःख are end-acute by Phit I. 6.

३९०६ । नञ्सुभ्याम् । ६ । २ । १७२ ॥

बहुव्रीहावुत्तरपदमन्तोदात्तम् । अव्रीहिः । सुमाषः ॥

3906. A Bahuvrîhi formed by the Negative particle 'nañ' or by 'su' has acute on the last syllable of the compound.

Thus अव्रीहि॑ः, सुमाष॑ः ॥

३९०७ । कपि पूर्वम् । ६ । २ । १७३ ॥

नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य पूर्वमुदात्तं कपि परे । अब्रह्मबन्धुकः । सुकुमारीकः ॥

3907. A Bahuvrîhi, formed by 'nañ' or 'su' and ending in the affix 'kap' (V. 4. 153) has acute on the syllable preceding the affix.

By the last sûtra, the accent would have fallen on कप्, this makes it fall on the vowel preceding it. Thus अब्रह्मबन्धु॑कः, सुकुमा॑रीकः ॥

३९०८ । ह्रस्वान्तेऽन्त्यात्पूर्वम् । ६ । २ । १७४ ॥

ह्रस्वान्त उत्तरपदे समासे अन्त्यात्पूर्वमुदात्तं कपि नञ्सुभ्यां परं बहुव्रीहौ । अव्रीहिकः । सुमाषकः । पूर्वमित्यनुवर्तमाने पुनः पूर्वग्रहणं प्रकृतिभेदेन नियमार्थम् । ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं न कपि पूर्वमिति । अज्ञकः । कबन्तस्यान्तोदात्तत्वम् ॥

3908. When the compound ends in a light vowel, the acute falls on the syllable before such last, in a Bahuvrîhi preceded by 'nañ' and 'su' to which 'kap' is added.

Thus अव्री॑हिकः, सुमा॑षकः । The repetition of पूर्व in this sûtra, though its anuvritti was present from the last, shows, that in the last aphorism, the syllable preceding कप् takes the acute, while here the syllable preceding the short-vowel-ending final syllable has the acute and not the syllable preceding कप् । This is possible with a word which is, at least, of two syllables (not counting, of course, सु and अ or कप्). Therefore, in अज्ञ॑कः and सुज्ञ॑कः, the acute is on the syllable preceding कप् by VI. 2. 173, because it has here no antyât-purvam.

३९०९ । बहोर्नञ्वदुत्तरपदभूम्नि । ६ । २ । १७५ ॥

उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात् । बहुव्रीहिकः । बहुमित्रकः । 'उत्तरपद-' इति किम् । बहुषु मानोऽस्य स बहुमानः ॥

3909. A Bahuvrîhi with 'bahu' has the same accent as 'nañ' when it denotes muchness of the object expressed by the second member.

In other words, a Bahuvrîhi with the word बहु in the first member, is governed by all those rules which apply to a Bahuvrîhi with a Negative Particle such as Rules VI. 2. 172 &c. when this gives the sense of multiety of the objects denoted by the second member. Thus बहुव्रीहिकः by VI. 2. 174. बहुमित्रकः ॥

Why do we say 'uttara-pada bhûmni—when multeity of the object denoted by the second member is meant'? Observe बहुषु मानोऽस्य=बहुमानः बहुमानः (VI. 2. 1).

३९१० । न गुणादयोऽवयवाः । ६ । २ । १७६ ॥

अवयववाचिनो बहोः परे गुणादयो नान्तोदात्ताः । बहुगुणा रज्जुः । बह्वक्षरं पदम् । बह्वध्यायः । गुणादिराकृतिगणः । 'अवयवाः' किम् । बहुगुणो द्विजः । अध्ययनश्रुतसदाचारादयो गुणाः ॥

3910. In a Bahuvrîhi, after 'bahu,' the acute does not fall on the final of 'guṇa' &c. when they appear in the compound as ingredient of something else.

Thus बहुगुणाः रज्जुः, बह्वक्षरं पदम्, बह्वध्यायः (VI. 2. 1). गुणादि is an Akrtigaṇa. Why do we say 'when it denotes an avayava or ingredient'? Observe बहुगुणो ब्राह्मणः = अध्ययनश्रुतसदाचारादयोऽस्य गुणाः ॥

1 गुण, 2 अक्षर, 3 अध्याय, 4 सूक्त, 5 छन्दोमान, आकृतिगण ॥

३९११ । उपसर्गात्स्वाङ्गं ध्रुवमपर्शु । ६ । २ । १७७ ॥

प्रपृष्ठः । प्रललाटः । ध्रुवमेकरूपम् । 'उपसर्गात्' किम् । दर्शनीयपृष्ठः । 'स्वाङ्गम्' किम् । प्रशाखो वृक्षः । 'ध्रुवम्' किम् । उद्बाहुः । 'अपर्शु' किम् । विपर्शुः ।

3911. A word denoting a part of the body, which is constant (and indispensable), with the exception of 'parśu' has, after a Preposition in a Bahuvrîhi compound, the acute on the last syllable.

Thus प्रपृष्ठः ; प्रललाटः । ध्रुवं यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठः ॥

Why do we say 'after a Preposition'? Observe दर्शनीयपृष्ठः ॥

Why do we say 'part of the body'? Observe प्रशाखो वृक्षः ॥

Why do we say 'dhruva—constant and indispensable'? Observe उद्बाहुः क्रोशति । Here the hand is raised up only at the time of cursing and not *always* so the state of उद्बाहु is temporary and not permanent.

Why do we say with the exception of पर्शु? Observe विपर्शुः (VI. 2. 1).

३९१२ । वनं समासे । ६ । २ । १७८ ॥

समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदात्तम् । तस्य विमे प्रवणे ॥

3912. After a preposition, 'vana' has acute on the final in compounds of every kind.

Thus प्रवणे यष्टव्यम्, निर्वणे प्रणिधीयते, the न changed to ण by VIII. 4. 5. The word 'samâsa' is used in the sûtra to indicate that all sorts of compounds are meant, otherwise only Bahuvrihi would have been meant.

३९१३ । अन्तः । ६ । २ । १७९ ॥

अस्मात्परं वनमन्तोदात्तम् । अन्तर्वणो देशः । अनुपसर्गार्थमिदम् ॥

3913. After 'antar' the acute falls on the final of 'vana.'

Thus अन्तर्वणो देशः । This sûtra is made in order to make वन oxytoned, when a preposition (upasarga) does not precede.

३९१४ । अन्तश्च । ६ । २ । १८० ॥

उपसर्गादन्तः शब्दोऽन्तोदात्तः । पर्यन्तः । समन्तः ॥

3914. The word 'antar' has acute on the final when preceded by a Preposition.

Thus पर्यन्तः, समन्तः । This is a Bahuvrihi or a प्रादि compound.

३९१५ । न निविभ्याम् । ६ । २ । १८१ ॥

न्यन्तः । व्यन्तः । पूर्वपदप्रकृतिस्वरे यणि कृते 'उदात्तस्वरितयोर्यणः–' (३६५७) इति स्वरितः ॥

3915. The word antar has not acute on the final. after the prepositions *ni* and *vi*.

Thus न्यन्तः, व्यन्तः, here the first member retains its acute, and semivowel is then substituted for the vowel इ then the subsequent grave is changed to svarita by VIII, 2. 4. S. 3657.

३९१६ । परेरभितोभावि मण्डलम् । ६ । २ । १८२ ॥

परेः परमभित उभयतो भावो यस्यास्ति तत्कूलादि मण्डलं चान्तोदात्तम् । परिकूलम् परिमण्डलम् ॥

3916. After 'pari' a word, which expresses something, which has both this side and that side, as well as the word 'mandala' has acute on the final.

Thus परिकूलम्, परिमण्डलम् ॥

३९१७ । प्रादस्वाङ्गं संज्ञायाम् । ६ । २ । १८३ ॥

प्रगहम् । 'अस्वाङ्गम्' किम् । प्रपदम् ॥

3917. After *pra*, a word, which does not denote a part of body, has acute on the final, when the compound is a name.

Thus प्रपदम् । Why do we say 'not denoting a body part'? Observe प्रपदम् ॥

३९१८ । निरुदकादीनि च । ६ । २ । १८४ ॥

अन्तोदात्तानि । निरुदकम् । निरुपलम् ॥

3918. The words *nirudaka* &c, have acute on the final.

Thus निरुदकम्, निरुपलम्, निर्मक्षिकम् &c.

1 निरुदक, 2 निरुपल निरुपल 3 निर्मक्षिक, 4 निर्मशक, 5 निष्कालक, 6 निष्कालिक, 7 निष्पेष, 8 दुस्तरीप, 9 निस्तरीप, 10 निस्तरीक, 11 निरजिन, 12 उदजिन, 13 उपाजिन, 14 परेर्हस्तपादकेशकर्षाः आकृतिगणः ॥

Note :—These may be considered either as प्रादि समास or Bahuvrihi. If they be considered as avyayî bhâva compounds then they are end-acute already by VI. I. 223. The word निष्कालकः = निष्क्रान्तः कालकात्, is a Prâdi-samâsa with the word काल ending in the affix कन् । The word दुस्तरीपः is thus formed : to the root तॄ is added the affix ई and we have तरी (Un III. 158) तरीम् आप्नोति = तरीपः ; कुत्सितः तरीपः = दुस्तरीपः । The word निस्तरीकः is formed by adding the affix कप् to the Bahuvrîhi निस्तरी । The words हस्त, पाद, केश and कर्ष have acute on the final after परि, as, परिहस्तः परिपादः, परिकेशः, and परिकर्षः ॥

३९१९ । अभेर्मुखम् । ६ । २ । १८५ ॥

अभिमुखम् । 'उपसर्गात्स्वाङ्गम्-' (३९११) इति सिद्धे अस्वाङ्गार्थमध्रुवार्थमस्वाङ्गार्थं च । अभिमुखा शाला ॥

3919. The word *mukha* has acute on the final when preceded by *abhi*.

As, अभिमुखम् । It is a Bahuvrihi or a प्रादि samâsa. If it is an Avyayîbhâva, then it would have acute on the final by VI. 1. 223 also. By VI. 2. 177, even मुख would have oxytone after an upasarga, the present sûtra makes the additional declaration that मुख is oxytone even when the compound is not a Bahuvrîhi, when it does not denote an indispensable part of body, or a part of body even, as was the case in VI. 2. 177. Thus अभिमुखं शाला ॥

३९२० । अपाच्च । ६ । २ । १८६ ॥

अपमुखम् । अपमुखम् । योगविभाग उत्तरार्थः ॥

3920. The word 'mukha' has acute on the final, after the preposition *apa*.

Thus अपमुखम् । The separation of this from the last sûtra, is for the sake of the subsequent aphorism, in which the anuvritti of अप only goes.

३९२१ । स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनाम नाम च । ६ । २ । १८७ ॥

अपादिमान्यन्तोदात्तानि । अपस्फिगम् । अपपूतम् । अपवीणम् । अञ्जस् । अपाञ्जः । अध्वन् । अपाध्वम् । 'उपसर्गादध्वनः' (९५३) इत्यस्याभाव इदम् । एतदेव च ज्ञापकं समासान्तानित्यत्वे । अपकुक्षि । सीरनाम । अपसीरम् । अपहलम् । नाम । अपनाम । स्फिगपूतकुक्षिग्रहणमस्वाङ्गार्थमध्रुवार्थमस्वाङ्गार्थं च ॥

3921. The words स्फिग, पूत, वीणा, अञ्जस्, अध्वन्, कुक्षि, नामन् and a word denoting 'a plough', have acute on the final, when preceded by *apa*.

Thus अपस्फिगम्, अपपूतम्, अपवीणम्, अपाञ्जः, अपाध्वा (This ordains acute on the final, where the compound apâdhwa does not take the samâsanta affix अच् by V. 4. 85, when it takes that affix, the acute will also fall on the final because अच् is a चित् affix.) This further shows that the samâsanta affixes are not compulsory. (अनित्यश्च समासान्तः), अपकुक्षिः, अपसीरः, अपहलः, अपलाङ्गलम्, अपनाम। These are प्रादि compounds or Bahuvrihi or Avyayîbhavas. Some of these viz. स्फिग, पूत and कुक्षिः will be end-acute by VI. 2. 177, also when they denote parts of body and a permanent condition and the compound is a Bahuvrihi. Here the compound must not be a Bahuvrihi, nor should these words denote parts of body and permanent condition of these parts.

३९२२ अधेरुपरिस्थम्। ६। २। १८८॥

अध्यारूढो दन्तोऽधिदन्तः। दन्तस्योपरि जातो दन्तः। 'उपरिस्थम्' किम्। अधिकरणम्॥

3922. After अधि, that word, which denotes that thing which overlaps or stands upon, has acute on the final.

Thus अधिदन्तः=दन्तस्योपरि योऽन्यो दन्तो जायते 'a tooth that grows over another tooth.'

Why do we say when meaning 'standing upon'? Observe अधिकरणम्। Here the acute is on क, the krit-formed second member retaining its accent (VI. 2. 139).

३९२३ अनोरप्रधानकनीयसी। ६। २। १८९॥

अनोःपरमप्रधानवाचि कनीयश्चान्तोदात्तम्। अनुगतो ज्येष्ठमनुज्येष्ठः। पूर्वपदार्थप्रधानः प्रादिसमासः। अनुगतः कनीयाननुकनीयान्। उत्तरपदार्थप्रधानः। प्रधानार्थं च कनीयोग्रहणम्। 'अप्र—' इति किम्। अनुगतो ज्येष्ठोऽनुज्येष्ठः॥

3923. After 'anu' a word which is not the Principal, as well as 'kanîyas' has acute on the final.

The word अप्रधान means a word which stands in a dependant relation in a compound. Thus अनुगतो ज्येष्ठम् = अनुज्येष्ठः। These are प्रादि samâsa in which the first member is the principal or Pradhâna. अनुगतः कनीयान्=अनुकनीयान्, here the second member is the Principal : the word कनीयस् is taken as प्रधान॥ Had it been non-pradhâna, it would be covered by the first portion of the sûtra, and there would have been no necessity of its separate enumeration. Why do we say 'अप्रधान'? Observe अनुगतो ज्येष्ठः=अनुज्येष्ठः, where ज्येष्ठ is the Principal.

३९२४। पुरुषश्चान्वादिष्टः। ६। २। १९०॥

अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः। अन्वादिष्टः पुरुषोऽनुपुरुषः। अन्वादिष्टः किम्। अनुगतः पुरुषोऽनुपुरुषः॥

3924. After 'anu' the acute falls on the final of 'purusha,' when it means a man of whom mention was already made.

The word अन्वादिष्ट means 'of a secondary importance, inferior,' or 'men, tioned again after having already been mentioned.' Thus अनु गदिष्टः पुरुषः = अनुपुरुषः; but अनुगतः पुरुषः = अनुपुरुषः ॥

३९२५ । अतेरकृत्पदे । ६ । २ । १९१ ॥

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः । अत्यङ्कुशो नागः । अतिपदा गायत्री । 'अकृत्पदे' किम् । अतिकारकः ॥

'+ अतेर्धातुलोप इति वाच्यम् +' । इहमा भूत् । शोभनो गार्ग्योऽतिगार्ग्यः । इह च स्यात् । अतिक्रान्तः कारकमतिकारकः ॥

3925. After 'ati' a word not formed by a kṛit-affix, and the word 'pada' have acute on the last syllable.

Thus अत्यङ्कुशो नागः, अतिपदा गायत्री । Why do we say 'nonkrit-word and पद'? Observe अतिकारकः ॥

Vârt:—The rule is restricted to those compounds in which a root has been elided. That is, when in analysing the compound, a verb like क्रम् is to be employed to complete the sense. Therefore, it does not apply to शोभनो गार्ग्यः= अतिगार्ग्यः ॥ But it would apply to अतिकारकः, which when analysed becomes equal to अतिक्रान्तः कारकम् ॥

३९२६ । नेरनिधाने । ६ । २ । १९२ ॥

निधानमप्रकाशता । ततोऽन्यदनिधानं प्रकाशनमित्यर्थः । निमूलम् । न्यक्षम् । 'अनिधाने' किम् । निहितो दण्डो निदण्डः ॥

3926. After 'ni' the second member has the acute on the last syllable, when the sense is of 'not laying down.'

The word निधानं=अप्रकाशता 'not making manifest.' Thus निमूलम्, न्यक्षम् । Why do we say when meaning 'not laying down'? Observe निदण्डः=निहितो दण्डः । The force of नि is that of निधान here.

३९२७ । प्रतेरंश्वादयस्तत्पुरुषे । ६ । २ । १९३ ॥

प्रतेः परेंऽश्वादयोऽन्तोदात्ताः । प्रतिगतोंऽशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । समासान्तस्यानित्यत्वाच टच् ॥

3927. In a Tatpurusha compound, the word 'anśu' &c have acute on the final when preceded by 'prati.'

Thus प्रत्यंशुः, प्रतिजनः, प्रतिराजा ॥ In the case of राजन् this rule applies when the Samâsânta affix टच् is not added, when that affix is added, the acute will also be on the final by virtue of टच् which is a चित् affix.

1 अंशु, 2 जन, 3 राजन्, 4 उष्ट्र, 5 खेटक (रोटक), 6 अजिर, 7 आर्द्रा, 8 श्रवण, 9 कृत्तिका, 10 अर्ध, 11 पुर (आर्धपुर आर्धपुरः) ॥

The word अंशु is formed by the affix कु under the general class मृगयु । (Uṇ I. 37), राजन् is formed by the affix कनिन् (Uṇ I. 156), उष्ट्र by adding ष्ट्रन् to

कुष 'to burn'. (Uṇ IV. 162), किन् + क्वुन् = कीटक ; अजिर is formed by किर (Uṇ I. 53) आ + द्रा + अङ् (III. 3. 106), with the augment रक् added to आ = आर्द्रा ॥ प्र+ल्युट् = प्रवणा ॥ कृत + तिकन् = कृत्तिका (Uṇ III. 147) ऋधू+अच् (III. 1. 134) = ऋध ; पुर् + क = पुर ॥

Why do we say 'in the Tatpurusha'? Observe प्रतिगता अंशवोऽस्य = प्रत्यंशुरयमुष्ट्रः ॥

३९२८ । उपाद्द्व्यजजिनमगौरादयः । ६ । २ । १९४ ॥

उपात्परं यद्द्व्यचकमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन्वर्जयित्वा । उपदेवः उपेन्द्रः । उपाजिनम् । 'अगौरादयः' किम् । उपगौरः । उपतैषः । 'तत्पुरुषे' किम् । उपगतः सोमोऽस्य स उपसोमः ॥

3928. In a Tatpurusha, the words of two syllables and 'ajina' have acute on the final when preceded by 'upa' but not when they are 'gaura' and the rest.

Thus उपगतो देवः=उपदेवः, उपेन्द्रः, उपाजिनम् । But not so in उपगौरः, उपतैषः &c.

1 गौर, 2 तैष (तैल) 3 तैल, 4 लेट, 5 लोट, 6 जिह्वा, 7 कृष्णा, (कृष्णा) 8 कन्या, 9 गुध (गुड) 10 कल्प, 11 पाद ।

Why 'in a Tatpurusha'? Observe उपगतः सोमोऽस्य = उपसोमः ॥

३९२९ । सोरवक्षेपणे । ६ । २ । १९५ ॥

सुप्रत्यवसितः । सूरत्र पूजायामेव । वाक्यार्थस्त्वत्र निन्दा असूयया तथाभिधानात् । 'सो' किम् । कुब्राह्मणः । 'अवक्षेपणे' किम् । सुवृषलम् ॥

3929. After 'su,' the second member has acute on the final in a Tatpurusha compound, when reproach is meant, in spite of the addition of 'su' which denotes praise.

Thus इह खल्विदानीं, सुस्थण्डिले सुस्फिताभ्यां सुप्रत्यवसितः । The word सु here verily denotes praise, but it is the sense of the whole sentence that indicates reproach or censure. Why do we say 'after सु'? Observe कुब्राह्मणः । Why 'when reproach is meant'? Observe शोभनेषु तृणेषु = सुतृणेषु । So also सुवृषलम् ॥

३९३० । विभाषोत्पुच्छे । ६ । २ । १९६ ॥

तत्पुरुषे । उत्क्रान्तः पुच्छादुत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयते । 'एरच्' (३२३१) । उत्पुच्छस्तदा थाथादिस्वरेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् । सेयमुभयत्र विभाषा । 'तत्पुरुषे' किम् । उदस्तं पुच्छं येन स उत्पुच्छः ॥

3930. In a Tatpurusha, the word 'utpuchha' may optionally have acute on the final.

Thus उत्क्रान्तः पुच्छात्=उत्पुच्छः or उत्पुच्छः (VI. 2. 2). When this word is derived by the affix अच् (III. 3. 56 S. 3231) from पुच्छमुदस्यति=उत्पुच्छयति, then it would always have taken acute on the final by VI. 2. 144, the present sûtra ordains option there also. The rule does not apply to a non-Tatpursha : as, उदस्तम् पुच्छमस्य=उत्पुच्छः ॥

३९३१ । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ । ६ । २ । १९७ ॥

आभ्यां परेषामन्तोदात्तो वा । 'द्विपाच्चतुष्पाच्च रथाय' । 'त्रिपादूर्ध्वः' । 'द्विदन्' 'त्रिमूर्धानं सप्तरश्मिम्' । मूर्धन्नित्यकृतसमासान्त एव मूर्धशब्दः । तस्यैतत्प्रयोजनमसत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकम् '×अनित्यः समासान्तो भवति×' इति । यद्यपि च समासान्तः क्रियते तथापि बहुव्रीहिकार्यत्वात्तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव । द्विमूर्धः । 'द्वित्रिभ्याम्' किम् । कल्याणमूर्धा । 'बहुव्रीहौ' किम् । द्वयोर्मूर्धा द्विमूर्धा ॥

3931. In a Bahuvrîhi, the words पाद्, दत् and मूर्धन् have optionally acute on the final after द्वि and त्रि ॥

Thus द्वौ पादावस्य = द्विपा॑त् or द्वि॑पात् as in द्विपाच्च चतुष्पाच्च रथाय (Rig Veda IV. 51. 5) त्रिपा॑द् or त्रि॑पाद् as in त्रिपादूर्ध्व॑म् (Rig Veda X. 90. 4) द्विद॑न् or द्वि॑दन् द्विमूर्धा॑ or द्वि॑मूर्धा as in त्रिमूर्धानम् सप्तरश्मिम् (Rig Veda I. 146, 1). The word पाद् is पाद with its अ elided, (V. 4. 140) दत् is the substitute of दन्त (V. 4. 141) and मूर्ध॑न् retains its न् not allowing samâsanta affix. This also indicates that the samâsanta rule is not universal. When the samâsanta affix is added, then also the acute is on the final, for the कार्य is here the Bahuvrîhi compound, and this is only a part of it. Thus द्विमूर्ध॑:, त्रिमूर्ध॑: । Why after द्वि and त्रि ? Observe कल्या॑णमूर्धा here the first member is middle acute by Phiṭ II. 19 and this accent is retained (VI. 2. 1.) Why 'Bahuvrîhi' ? Observe द्वयोर्मूर्धा=द्विमूर्धा ॥

३९३२ । सक्थं चाक्रान्तात् । ६ । २ । १९८ ॥

गौरसक्थः । श्लक्ष्णसक्थः । 'अक्रान्तात्' किम् । चक्रसक्थः । समासान्तस्य यद्यपि चित्त्वा- त्सत्यमेवान्तोदात्तत्वं भवति ।

3932. The word 'saktha' has acute on the final optionally, when preceded by any word other than what ends in 'kra'

The word सक्थ is the samâsânta form of सक्थि (V. 4. 113). Thus गौरसक्थ॑ or गौ॑रसक्थः, श्लक्ष्णसक्थ॑: or श्लक्ष्ण॑सक्थः The word गौर being formed by प्रज्ञादि अण् and श्लक्ष्ण by क्स्न (Uṇ. III. 19) are both end-acute. Why 'not after a word ending in क्र' ? Observe चक्रसक्थ॑: which is *always* oxytone as it is formed by षच् (V. 4. 113) a चित् affix.

३९३३ । परादिश्छन्दसि बहुलम् । ६ । २ । १९९ ॥

छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा । 'अञ्जिसक्थमालभेत' । अत्र वार्तिकम्—

'* परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।

पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः *' ॥

इति । परादिः । 'तुविजाता उरुक्षया' । परान्तः । 'नियेन मुष्टिहत्यया' । 'धस्त्रिचक्रः' । पूर्वान्तः 'विश्वायुर्धेहि' ।

इति समासस्वराः ।

3933. The first syllable of the second member is diversely acute, in the Vedas.

The word पर "the second member" refers to सक्थ, as well as to any other word in general. Thus अञ्जिसक्थ॑मालभेत, but लोमश॑सक्थः so also ऋजुबाहुः, वाक्पतिः, चित्पति ॥

In the non-Vedic literature these last two compounds will be final acute by VI. 1. 223, rule VI. 2. 18 not applying because of the prohibition contained in VI. 2. 19.

The rule is rather too restricted. It ought to be: "In the Vedas, the *first* syllable and the *final* syllable of the *second* member, as well as the *final* syllable and the *first* syllable of the *preceding* member are seen to have the acute accent, in supersession of all the foregoing rules."

(1) As to where the *first* syllable of the second member (परादिः) takes the accent, we have तुविजाता उरुक्षया (Rig Veda I. 2. 9.)

(2) As to where the final of all the second terms (परान्तः) takes the acute we have नियुत्वं सुष्टिहत्यायां (Rig Veda I. 8. 2.) वरिस्वरथः (Rig Veda I. 183. 1.)

(3) As to where the final of the preceding (पूर्वान्तः) takes the acute, we have विश्वायुः धेहि ॥

(4) As to where the first syllable of the preceding (पूर्वादिः) takes the acute we have as दिवोदासाय सामगाय ते ॥

Here end the Accents of Compounds.

CHAPTER V.

ACCENTS OF VERBS.

३९३४ । तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः । ८ । १ । २७ ॥

तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः । पचति गोत्रम् । पचतिपचति गोत्रम् । एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः । कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् । तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम् । 'गोत्रादि-' इति किम् । पचति पापम् । 'कुत्स-' इति किम् । खनति मेध्यं ; समेत्य कूपम् ॥

3934. The words *gotra* &c., become unaccented after a finite verb, when a contempt or a repetition is intended.

Thus पचति गोत्रम्, when contempt is meant.

Here पचति गोत्रं means 'he proclaims his Gotra &c., so that he may get food &c.' पचति is from the root पचि व्यक्तीकरणे 'to make evident' (Bhu. 184). Where contempt is not meant, it has the force of repetition, *i. e.* he repeatedly utters his Gotra as one is bound to do, in marriage-rites &c. And पचति पचति गोत्रम्, when repetition or intensity is denoted. Similarly पचति ब्रुवम्, पचति पचति ब्रुवम् । The word ब्रुवं is a noun derived from the root ब्रू by the affix कन्, the वच् substitution for ब्रू has not taken place, as an anomaly.

1 गोत्र, २ ब्रुव, 3 प्रवचन, 4 प्रहसन, 5 प्रकथन, 6 प्रत्यायन, 7 प्रपञ्च, 8 प्राय, 9 न्याय 10 प्रचक्षण, 11 विचक्षण, 12 अवचक्षण, 13 स्वाध्याय, 14 भूयिष्ठ, 15 वा नाम (नाम वा) 16 प्रठ्यन, 17 प्रवजन ॥

The word गात्र optionally becomes anudâtta : in the alternative, it is first acute. Thus पचति गात्र or पचति गात्र ॥

The words 'contempt and repetition' in the text qualify the whole sentence or sûtra, and not the word गोत्रादि nor the word अनुदात्त understood. For we find that wherever the word गोत्रादि is used in this Chapter, it always implies the sense of 'contempt or repetition.' Thus the word गोत्रादि is used in VIII. 1. 57 and there also the sense is of contempt and repetition.

Why do we say 'Gotra and the rest'? Observe पचति पापम् । Here पापं is an adverb.

Why do we say 'when contempt or repetition is meant'? Observe खनति गोत्रं समेत्य कूपं । 'He digs a well, having assembled the Gotra.'

३९३५ । तिङ्ङतिङः । ८ । १ । २८ ॥

अतिङन्तात्पदात्परं तिङन्तं निहन्यते । 'अग्निमीळे' ॥

3935. A finite verb is unaccented, when a word precedes it, which is not a finite verb.

Thus अग्निमीळे पुरोहितं (Rv. I. 1. 1). स इद्देवेषु गच्छति (Rv. I. 1. 4), सोऽग्ने सूपायनो भव (Rv. V. 1. 1), यजमानस्य पशून् पाहि ॥

३९३६ । न लुट् । ८ । १ । २९ ॥

लुडन्तं न निहन्यते । श्वःकर्ता ॥

3936. But the Periphrastic Future is not unaccented, when it is preceded by a word which is not a finite verb.

This restricts the scope of the last sûtra which was rather too wide. Thus श्वः कर्ता, श्वः कर्तारौ, मासेन कर्तारः । The Sarvadhâtuka affixes डा, रौ, रस्, are anudâtta after the affix तासि by VI. 1. 186, the whole affix तास् becomes udâtta (III. 1. 3) and where the टि portion of तास् i. e. the syllable आस्, is elided before the affix डा, there also the आ of डा becomes udâtta, because the udâtta has been elided. See VI. 1. 161.

३९३७ । निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् । ८ । १ । ३० ॥

एतैर्निपातैर्युक्तं न निहन्यते । 'यदग्ने स्यामहं त्वम्' । 'युवा यदी कृथः' । 'कुविदङ्ग आसन्' । 'अग्निश्चिद्धि ष्मातसे' । 'पुत्रासो यत्र पितरो भवन्ति' ॥

3937. The finite verb retains its accent in connection with the particles यत्, 'that,' 'because,' यदि, 'if', हन्त, 'also'!, 'O!' कुवित्, 'well', नेत्, 'not', चेत्, 'if', च 'if', कच्चित् (interrogative particle, implying 'I hope' or 'I hope not)', and *yatra* 'where.'

Thus यदग्ने स्यामहं त्वं (Rig Veda VIII. 44. 23). युवा यदी कृथः (Rig Veda V 74. 5). कुविदङ्ग आसन् (Rig Veda VII. 91. 1). नेज्जिह्मायन्त्यो नरकं पताम Nir. I. 11), स चेद् भुङ्क्ते; स चेद् अधीते; पुत्रासो यत्र पितरो भवन्ति (Rig Veda I. 89. 9.

The particle चण् with the indicatory ण् has the force of चेत्। Thus अयं च मरिष्यति = अयं चेन् मरिष्यति ॥

३९३८ । नह प्रत्यारम्भे । ८ । १ । ३१ ॥

नहेत्यनेन युक्तं तिङन्तं नानुदात्तम् । प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः । 'नह भोक्ष्यसे' । प्रत्यारम्भे किम् । 'नह वै तस्मिँल्लोके दक्षिणमिच्छन्ति' ॥

3938. The finite verb retains its accent in connection with 'naha' when employed in the sense of forbidding.

When something urged by one, is rejected insultingly by another, then the reply made by the first tauntingly, with a negation, is pratyârambha. Thus A says to B: 'Eat this please.' B rejects the offer repeatedly, in anger or jest. Then A in anger or jest says 'No, you will eat'—as नह भोक्ष्यसे। Here भोक्ष्यसे retains its accent, which is acute on the middle, for से becomes accentless as it follows अनुदात्त (VI. 1. 186), and स्य becomes udâtta by the प्रत्ययस्वर (III. 1. 3).

Why do we say, 'when asseverative'? Observe नह वै तस्मिँल्लोके दक्षिणमिच्छन्ति. 'Verily in that world they do not wish for fee.' Here it is pure negation. तस्मिन् is first acute by फिट् accent, लोके is final acute because it is formed by अच् of पचादि (III. 1. 134), दक्षिणा is first-acute, because it is a Pronoun ending in अ (स्वाङ्गशिटामदन्तानाम् Phit II. 6) and इच्छन्ति is anudâtta by VIII. 1. 28.

३९३९ । सत्यं प्रश्ने । ८ । १ । ३२ ॥

सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने । सत्यं भोक्ष्यसे । 'प्रश्ने' किम् । 'स त्यमिद्वा उ तं वयमिन्द्रं स्तवाम' ॥

3939. The finite verb retains its accent in connection with 'satya' when used in asking a question.

Thus सत्यं भोक्ष्यसे 'Truly, will you eat'? सत्यमध्येष्यसे। Why do we say 'in questioning'? Observe स त्यमिद्वा उ तं वयमिन्द्रं स्तवाम ॥

३९४० । अङ्गाप्रातिलोम्ये । ८ । १ । ३३ ॥

अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम् । अङ्ग कुरु । 'अप्रातिलोम्ये' किम् । 'अङ्ग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म' । अनभिप्रेतमसौ कुर्वन्प्रतिलोमो भवति ॥

3940. The finite verb retains its accent in connection with 'anga' when used in a friendly assertion.

Anything done to injure another is pratiloma, opposite of this is apratiloma, or friendliness. In fact, it is equal to anuloma. Thus अङ्गकुरु 'yes, you may do.' Here anga has the force of friendly permission.

But when it has the force of pratiloma, we have:—अङ्ग कूज३ वृषल । इदानीं ज्ञास्यसि जाल्म 'Well, chuckle O sinner! soon wilt thou learn, O coward.' Here अङ्ग is used in the sense of censure, for chuckling is a thing not liked by the person and is pratiloma action: for pluta-vowel see VIII. 2. 96.

३९४१ । हि च । ८ । १ । ३४ ॥

हियुक्तं तिङन्तं नानुदात्तम् । 'आ हि ष्मा याति' । 'आ हि रुहतम्' ॥

3941. The finite verb retains its accent in connection with 'hi' when used in a friendly assertion.

Thus :—आहिष्मा याति (Rig Veda IV. 29. 2). आहिरुहत' (Rig Veda VIII. 22. 9).

३९४२ । छन्दस्यनेकमपि साकाङ्क्षम् । ८ । १ । ३५ ॥

हीत्यनेन युक्तं साकाङ्क्षमनेकमपि नानुदात्तम् । 'अनृतं हि मत्तो वदति' । 'पाप्मा एनं विपुनाति' । तिङन्तद्वयमपि न निहन्यते ॥

3942. In the Vedas, the finite verb retains its accent (but not always), in connection with 'hi', when it stands in correlation to another verb, even more than one.

That is, sometimes one verb, sometimes more than one verb retain their accent. Thus of more than one verb, we have the following example :—अनृतं हि मत्तो वदति । पाप्मा एनं वि पुनाति 'Because the drunkard tells falsehood, therefore sin will make him impure : *i. e.* he does incur sin." Here both verbs वदति and विपुनाति retain their accent : and हि has the force of यत् 'because'.. According to Kaiyyata the meaning of this sentence is यस्मात् मत्तोऽनृतं वदति, तस्मादनृतवदन दोषेण न युज्यते *i. e.* a drunkard does not incur the sin of telling a falsehood, because he is not in his senses. See Maitra Sanhita I. 11. 6.

३९४३ । यावद्यथाभ्याम् । ८ । १ । ३६ ॥

आभ्यां योगे तिङन्तं नानुदात्तम् । 'यथा चित्कण्वमावतम्' ॥

3943. A finite verb retains its accent in connection with 'yâvat' and 'yathâ'.

The meaning is that the verb retains its accent, even when यावत् and यथा followed after it. Thus यथा चित् कण्वमावतम् । The word आवतम् is the Imperative (लोट्) Second Person Dual of the root अव् ॥

३९४४ । पूजायां नानन्तरम् । ८ । १ । ३७ ॥

यावद्यथाभ्यां युक्तमनन्तरं तिङन्तं पूजायां नानुदात्तम् । यावत्पचति शोभनम् । यथा पचति शोभनम् । पूजायाम्' किम् । यावद्भुङ्क्ते । 'अनन्तरम्' किम् । यावद्देवदत्तः पचति शोभनम् । पूर्वेणात्र निघातः प्रतिषिध्यते ॥

3944. But not so when these particles 'yâvat' and 'yathâ' immediately precede the verb and denote 'praise'.

That is, the verb loses its accent, and becomes anudâtta. Thus यावत् पचति शोभनम्, यथा पचति शोभनम् ॥

Why do we say when denoting 'praise' ? Observe यावद् भुङ्क्ते ॥

Why do we say 'immediately'? Observe यावद् देवदत्तः पचति शोभनं । Here the verb retains its accent by the last sûtra.

३९४५ । उपसर्गव्यपेतं च । ८ । १ । ३८ ॥

पूर्वेणानन्तरमित्युक्तम् । उपसर्गव्यवधानार्थं वचनम् । यावत्प्रपचति शोभनम् । अनन्तरमित्येव । यावद्देवदत्तः प्रपचति शोभनम् ॥

3945. A finite verb loses its accent, when it denotes 'praise' and is joined immediately with yâvat and yathâ, through the intervention of an upasarga (or verbal-preposition).

The last sûtra taught that the verb loses its accent when *immediately* preceded by यावत् and यथा। This qualifies the word 'immediately' and teaches that the intervention of a Preposition does not debar immediateness. Thus यावत् प्रपचति शोभनम् ॥

The word 'immediately' is understood here also. Thus यावद् देवदत्तः प्रपचति शोभनं ॥ The upasarga प्र has udâtta accent.

३९४६ । तुपश्यपश्यताहैः पूजायाम् । ८ । १ । ३९ ॥

एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम् । 'आदह स्वधामनु पुनर्गर्भत्वमेरिरे' ॥

3946. A finite verb retains its accent in connection with तु, पश्य, पश्यत, and अह, when meaning 'praise'.

Thus आदह स्वधामनु पुनर्गर्भत्वमेरिरे ॥

३९४७ । अहो च । ८ । १ । ४० ॥

एतद्योगे नानुदात्तं पूजायाम् । अहो देवदत्तः पचति शोभनम् ॥

3947. A finite verb retains its accent when in connection with *aho* meaning 'praise'.

Thus अहो देवदत्तः पचति शोभनं ॥

३९४८ । शेषे विभाषा । ८ । १ । ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं वानुदात्तं पूजायाम् । अहो कटं करिष्यति ॥

3948. A finite verb retains its accent optionally, when in connection with *aho* in the remaining cases (*i. e.* where it does not mean praise).

What is the शेष alluded to here? The शेष means here senses other than पूजा or 'praise.' Thus कटमहो करिष्यति or कटमहो करिष्यति । This is a speech uttered in anger or envy and not in praise (असूया वचन) ॥

३९४९ । पुरा च परीप्सायाम् । ८ । १ । ४२ ॥

पुरेत्यनेन युक्तं वानुदात्तं त्वरायाम् । अधीष्व माणवक पुरा विद्योतते विद्युत् । निकटागामिन्यत्र पुराशब्दः । परीप्सायां किम् । न ह स्म पुराधीयते । चिरातीतेऽत्र पुरा ॥

3949. A finite verb retains its accent optionally in connection with 'purâ' when it means 'haste' (*i. e.* when 'purâ' means 'before').

The word परीप्सा means त्वरा or 'quick.' Thus अधीष्व माणवक पुरा विद्योतते विद्युत् । The word पुरा here expresses the future occurrance which is imminent

or very near at hand. It is against the rule of Dharmaśāstras to study while it thunders or lightens.

Why do we say 'when meaning *haste*'? Observe नतेन स्म पुराधीयते । Here the word पुरा expresses a past time; that is, it means 'long ago.' See III. 2. 118 and 122, for the employment of पुरा in the Past Tense, and III. 3. 4, for the Present.

३९५० । नन्वित्यनुज्ञैषणायाम् । ८ । १ । ४३ ॥

नन्वित्यनेन युक्तं तिङन्तं नानुदात्तमनुज्ञैषणायाम् । 'ननु गच्छामि भोः । अनुजानीहि मां गच्छन्तमित्यर्थः । 'अनु-' इति किम् । अकार्षीः कटं त्वम् । ननु करोमि । पृष्टप्रतिवचनमेतत् ॥

3950. A finite verb retains its accent in connection with *nanu*, when with this Particle permission is asked.

The word एषणा means 'asking, praying.' The word अनुज्ञा means 'permission.' The compound अनुज्ञैषणा means 'asking of permission.' Thus ननु गच्छामि भोः 'can I go sir.' The sense is 'give me permission to go.'

Why do we say when 'asking for' permission'? Observe अकार्षीः कटं त्वम् ? ननु करोमि भोः 'hast thou made the mat? Well, I am making it.' Here ननु has the force of an answering particle, and not used in asking permission and hence the verb loses its accent.

३९५१ । किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् । ८ । १ । ४४ ॥

क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं नानुदात्तम् । किं द्विजः पचत्याहोस्विद्गच्छति । 'क्रिया-' इति किम् । साधनप्रश्ने मा भूत् । किं भक्तं पचत्यपूपान्वा । 'प्रश्ने' किम् । किं पठति । 'क्षेपोऽयम्' । 'अनुपसर्गम्' किम् । किं प्रपचति उत प्रकरोति । 'अप्रतिषिद्धम्' किम् । किं द्विजो न पचति ॥

3951. A finite verb retains its accent in connection with *kim*, when with this is asked a question relating to an action, and when the verb is not preceded by a Preposition or by a Negation.

Thus किं द्विजः पचति, आहो स्विद् गच्छति ॥

Why do we say when the question relates to a क्रिया or action? The rule will not apply, when the question relates to an object or साधन । Thus किं भक्तं पचति अपूपान् वा ॥

Why do we say 'when a question is asked'? Observe किम् पठति । Here किं is used to express contempt, and not to ask a question.

Why do we say 'not preceded by a Preposition' Observe किं प्र पचति उत प्रकरोति ॥

Why do we say 'not preceded by a negative particle.' Observe, किं द्विजो न पठति ॥

३९५२ । लोपे विभाषा । ८ । १ । ४५ ॥

किमोऽप्रयोगे उक्तं वा । देवदत्तः पचत्याहोस्वित्पठति ॥

3952. When however *kim* is not added in asking such a question, the finite verb may optionally retain its accent.

When किम् is elided in asking a question relating to an action, the finite verb which is not preceded by a Preposition or a Negative Particle, optionally does not become anudâtta. When is there the elision of this किम् because no rule of Pâṇini has taught it? When the sense is that of an interrogation, but the word किम् is not used. In short, the word 'lopa' here does not mean the Grammatical substitute, but merely non-use. As देवदत्तः पचति (or पचति) श्वोस्वित् पठति (or पठति) Here the sentence is interrogative, even without the employment of किम्। The option of this sûtra, is a Prâpta-vibhâsha, as it is connected with the sense of किम् ॥

३९५३ । एहिमन्ये प्रहासे लृट् । ८ । १ । ४६ ॥

एहिमन्यइत्यनेन युक्तं लृडन्तं नानुदात्तं क्रीडायाम् । एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्व तिथिभिः । 'प्रहासे' किम् । एहि मन्यसे ओदनं भोक्ष्य इति सुष्ठु मन्यसे । 'गत्यर्थलोटा–(३९५८) लृडित्यनेनैव सिद्धे नियमार्थोऽयमारम्भः । एहिमन्येयुक्ते प्रहास एव नान्यत्र । 'एहि मन्यसे ओदनं भोक्ष्ये' ॥

3953. In connection with 'ehimanye' used derisively, the First Future, that follows it, retains its accent.

The word प्रहास means great laughter, *i. e.* derision, mockery, raillery, jeering, gibing, sneering. Thus एहि मन्ये भक्तं भोक्ष्यसे, नहि भुक्तंतत्त्वतिथिभिः। The word एहि is the Imperative, second Person of the root इण् preceded by the preposition आङ् ॥

Why do we say 'used derisively'? Observe एहि मन्यसे ओदनं भोक्ष्ये इति। सुष्ठु मन्यसे, ॥

By sûtra VIII. 1. 51, S. 3958 after the Imperative एहि which is a verb of 'motion' (गत्यर्थ) the following First Future (लृट्) would have retained its accent. The present sûtra makes a niyama or restriction, namely, that in connection with the Imperative एहि मन्ये, the लृट् is accented only then when 'derision' is meant and not otherwise. Thus the लृट्, loses its accent here :—एहि मन्यसे ओदनं भोक्ष्ये ॥

३९५४ । जात्वपूर्वम् । ८ । १ । ४७ ॥

अविद्यमानं पूर्वं यस्माज्जातु तेन युक्तं तिङन्तं नानुदात्तम् । जातु भोक्ष्यसे । 'अपूर्वम्' किम् । कटं जातु करिष्यसि ॥

3954. A finite verb retains its accent after 'jâtu' when this 'jâtu' is not preceded by any other word.

Thus जातु भोक्ष्यसे। Here से is anudâtta by VI. 1. 186, as it is a sârvadhâtuka affix coming after an अनुदात्तेत्; the word जातु is first acute, as it is a Nipâta. Why do we say 'when not preceded by any other word'? Observe—कटं जातु करिष्यसि। The word कटं is end-acute as it is a फिट् or noun.

३९५५ । किंवृत्तं च चिदुत्तरम् । ८ । १ । ४८ ॥

अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तं नानुदात्तम् । विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम् । कश्चिद्भुङ्क्ते । कतरश्चित् । कतमश्चित् । 'चिदुत्तरम्' किम् । को भुङ्क्ते । अपूर्वमित्येव । रामः किंचित्पठति ॥

3955. Also after a form of 'kim' when the particle 'chit' follows it, and when no other word precedes such form of 'kim', the finite verb retains its accent.

The word किमवृत्तं is a Genitive Tatpurusha meaning किमोवृत्तं। The word किमवृत्तं means any form of किम् with its case-affixes, as well as the forms of किम् when it takes the affixes डतर and डतम। Thus कश्चिद् भुङ्क्ते, कतरश्चित् करोति, कतमश्चिद् भुङ्क्ते॥

Why do we say 'followed by चित्'? Observe को भुङ्क्ते॥

The word अपूर्व of the last sûtra qualifies this also; therefore, the verb loses its accent here:— रामः किंचित् पठति॥

३९५६। आहो उताहो चानन्तरम्। ८। १। ४९॥

आहो उताहो इत्याभ्यां युक्तं तिङन्तं नानुदात्तम्। आहो उताहो वा भुङ्क्ते। अनन्तरमित्येव। शेषे विभाषां वक्ष्यति। 'अपूर्व-' इति किम्। देव आहो भुङ्क्ते॥

3956. Also after an immediately preceding 'âho' and 'utâho' when these follow after no other word, the verb retains its accent.

The prohibition of *nighâta* or want of accentuation is understood here, so also there is the anuvritti of अपूर्व from the last.

Thus आहो or उताहो भुङ्क्ते। Why do we say 'immediately preceding'? In the following sûtra will be taught option, when these particles do not immediately precede the verb.

Why do we say 'when no word precedes them'? Observe देव आहो or उताहो भुङ्क्ते॥

३९५७। शेषे विभाषा। ८। १। ५०॥

आभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तम्। आहो देवः पचति॥

3957. When the abovementioned particles 'âho' and 'utâho' do not immediately precede the verb, the verb may optionally retain its accent.

Thus आहो देवः पचति or पचति॥

३९५८। गत्यर्थलोटा लृण्नचेत्कारकं सर्वान्यत्। ८। १। ५१॥

गत्यार्थानां लोटा युक्तं तिङन्तं नानुदात्तम्। यत्रैव कारके लोट् तत्रैव लृडपि चेत्। आगच्छ देव ग्रामं द्रक्ष्यसि। उह्यन्तां देवदत्तेन शालयः। रामेण भोक्ष्यन्ते। 'गत्यर्थ-' किम्। पच देव ओदनं भोक्ष्यसेऽन्नम्। 'लोटा' किम्। आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम्। 'लृट्' किम्। आगच्छ देव देव ग्रामं पश्यस्येनम्। 'न चेत्' इति किम्। आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यते। 'सर्वम्' किम्। आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातनिषेधो यथा स्यात्। यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते॥

3958. The First Future retains its accent in connection with the Imperative of a verb denoting 'motion' ('to go' 'to come' 'to start' &c), but only in that case, when the subject and object of both the verbs are not wholly different one from another.

Those verbs which have similar meaning with the word गति 'motion' are called गत्यर्थाः ॥ The Imperative of the गत्यर्थ verbal roots, is called गत्यर्थ-लोट् । In connection with such an Imperative of verbs of 'motion', the First Future does not become anudâtta, if the kâraka is not all different. The sense is, with whatever case-relation (kâraka), whether the Subject or Object, the Imperative is employed, with the same kâraka, the First Future must be employed. In connection with the finite verb here, the word कारक denotes the Subject and Object only, and not any other kâraka, such as Instrument, &c.

Thus आगच्छ देव ग्रामं, द्रक्ष्यसि 'Come O Deva, thou shalt see the village.' Here the subjects of both verbs आगच्छ and द्रक्ष्यसि are the same, and the objects of both verbs are also the same, namely ग्रामं । आ is a Preposition and is accented. गच्छ and देव both lose their accent (VIII. 1. 19 and 28,) ग्राम is first-acute being formed by the नित् affix मन् । Similarly उह्यन्तां देवदत्तेन शालयः, रामेण भोक्ष्यन्ते "Let the rice be carried by Devadatta, they will be eaten by Râma."

Why do we say 'verbs of motion'? Observe पच देव ओदनं, भोक्ष्यसे एनम् ॥

Why do we say 'after the Imperative'? Observe आगच्छेर्देव ग्रामं, द्रक्ष्यस्येनम् । Here the Potential mood is used.

Why do we say the 'First Future'? Observe आगच्छ देवदत्त ग्रामं, पश्यसि एनम् ॥ Here the Present Tense is used.

Why do we say 'if the kâraka is not *wholly* different'? Observe आगच्छ देवदत्त ग्रामं, पिता ते ओदनं भोक्ष्यते ॥

Why do we use the word सर्व 'wholly'? Observe आगच्छ देवदत्त ग्रामं, त्वं चाहं च द्रक्ष्याव एनम् । Here also there is prohibition of *nighâta*, and the First Future retains its accent, for the subject of the Future is not *wholly* different from that of the Imperative. For here the subject of the Imperative is the subject also of the Future, though only partly, in conjunction with another. Moreover, the object here in both is the same. Had सर्व not been used in the sûtra, where the sentence would have remained the same, there the rule would have applied, and not where the sentences became different.

३९५९ । लोट् च । ८ । १ । ५२ ॥

लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम् । आगच्छ देव ग्रामं पश्य । 'गत्यर्थ—' इति किम् । पच देवौदनं भुङ्क्ष्वैनम् । 'लोट्' किम् । आगच्छ देव ग्रामं पश्यसि । न चेत्कारकं सर्वान्यदित्येव । आगच्छ देव ग्रामं पश्यत्वेनं रामः । सर्वपदग्रहणमिह स्यादेव । आगच्छ देव ग्रामं त्वं चाहं च पश्याव । योगविभाग उत्तरार्थः ॥

3959. Also an Imperative, following after an Imperative of verbs of 'motion', retains its accent, when the subject or object of both the verbs, is not wholly different.

Thus आगच्छ देव ग्रामं पश्य ॥

But not here पच देवौदनं, भुङ्क्ष्वैनम्, because the first Imperative is not one of गत्यर्थ verb. Nor here, आगच्छेर्देव ग्रामं पश्येनम् because the first verb is not Imperative but Potential.

If the subject and object of both Imperatives are wholly different, the rule will not apply. Thus आगच्छ देव ग्राम, पश्यतु एनं रामः ॥

By the force of the anuvritti of सर्वं the rule will apply to the following: आगच्छ देव ग्रामं, त्वं चाहं च पश्यावः ॥

The separation of this sûtra from the last, is for the sake of the subsequent sûtra, by which the 'option' is with regard to लोट् and not लृट् ॥

३९६० । विभाषितं सोपसर्गमनुत्तमम् ॥ ८ ॥ १ ॥ ५३ ॥

लोडन्तं गत्यर्थलोटा युक्तं तिङन्तं वानुदात्तम् । आगच्छ देव ग्रामं प्रविश । 'सोपसर्गम्' किम् । आगच्छ देव ग्रामं पश्य । 'अनुत्तमम्' किम् । आगच्छानि देव ग्रामं प्रविशानि ॥

3960. An Imperative preceded by a Preposition, and not in the First Person, following after an Imperative of verbs of 'motion', may optionally retain its accent, when the Kâraka is not wholly different.

The whole of the preceding sûtra is understood here. This is a Prâpta-vibhâshâ. Thus आगच्छ देव ग्रामं प्रविश or प्र विश । When the verb is accented the upasarga loses its accent by VIII. 1. 71.

Why do we say सोपसर्गं 'joined with a Preposition'? When there is no Preposition, there is no *option* allowed, and the last rule will apply. As आगच्छ देव ग्रामं पश्य ॥

Why do we say अनुत्तमं 'not a First Person'? Observe आ गच्छानि देव, ग्रामं प्रविशानि ॥

३९६१ । हन्त च ॥ ८ ॥ १ ॥ ५४ ॥

हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम् । हन्त प्रविश । सोपसर्गमित्येव । हन्त कुरु । 'निपातैर्यद्यदि-' (३९३७) इति निघातप्रतिषेधः । 'अनुत्तमम्' किम् । हन्त प्रभुनजावहै ॥

3961. An Imperative, with a Preposition preceding it, may optionally retain its accent, in connection with 'hanta,' but not the First Person.

With the exception of गत्यर्थ लोटा &c., the whole of the preceding sûtra is understood here.

Thus हन्त प्र विश or प्रविश । But no option is allowed here हन्त कुरु, as it is not preceded by a preposition. Here rule VIII. 1. 30, S. 3937 makes the accent compulsory after हन्त । So also हन्त प्रभुनजावहै, where the 1st Person is used, the verb retains its accent compulsorily by VIII. 1. 30 S. 3937.

The word प्रभुनजावहै is Imperative First Person, Dual of the root भुज् in Atmane pada (I. 3. 66) The Personal ending वहै is anudâtta by VI. 1. 186, because the verb is anudâtta-it. The vikarana न therefore retains its accent.

३९६२ । आम एकान्तरमामन्त्रितमनन्तिके ॥ ८ ॥ १ ॥ ५५ ॥

आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तम् । आम् । पचसि देवदत्त३ । 'एकान्तरम्' किम् । आम प्रपचसि देवदत्त३ । 'आमन्त्रितम्' किम् । आम्पचति देवदत्तः । 'अनन्तिके' किम् । आम्पचसि देवदत्त ॥

3962. After 'âm,' but separated from it by not more than one word, the Vocative retains its accent, when the person addressed is not near.

Thus आम् पचसि देवदत्ता३ । The *nighâta* being hereby prohibited, the vocative gets accent on the first syllable by VI. 1. 198.

Why do we say आम् ? Observe आक पचसि देवदत्त । Here it is anudâtta by VIII. 1. 19.

Why do we say एकान्तरम् 'separated only by one word'? Observe आम् प्र पचसि देवदत्ता ३ ॥

Why do we say 'the Vocative'? See आम् पचति देवदत्तः ॥

Why do we say अनन्तिके 'not near'? See आम् पचसि देवदत्त ॥

३९६३ । यद्धितुपरं छन्दसि । ८ । १ । ५६ ॥

तिङन्तं नानुदात्तम् । 'उदसृजो यदङ्गिरः' । 'उशन्ति हि' । आख्यास्यामि तु ते । 'निपातैर्यद्–' (३९३७) इति 'हि च' (३९४१) इति 'तुपश्य–' (३९४८) इति च सिद्धे नियमार्थमिदम् । एतैरेव परभूतैर्योगे नान्यैरिति । आये स्वा रोहावैहि । एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति ॥

3963. A finite verb followed by *yat* or *hi* or *tu* retains it accent in the Chhandas.

The anuvritti of आमन्त्रित should not be taken in this sûtra, but that of तिङ् ॥ Thus with यत्परं we have:—गवां गोत्रमुदसृजो यदङ्गिरः । The verb उदसृज is the Imperfect (लङ्) 2nd person singular of सृज् of the Tudâdi class. With हि we have, इन्दवो वां उशन्ति हि (Rig Veda 1. 2. 4). The verb उशन्ति is the Present (लट्) Plural of वश् of the Adâdi class. The samprasârana takes place because it belongs to ग्रहादि class. With तु we have, आख्यास्यामि तु ते । By the previous sûtra VIII. 1. 30, S. 3937 a verb in connection with यत् would have retained its accent, so also in connection with हि by the sûtra VIII. 1. 34, S. 3941 and in connection with तु by VIII. 1. 39, S. 3946; the present sûtra is, therefore, a niyama rule. The verb retains its accent when these three Particles *only* follow and not any other. If any other Particle follows, the verb need not retain its accent. Thus आये स्वा रोहावैहि । Here रोहाव is the 1st Person Dual of the Imperative of रुह् (रुह् + शप् + वस् = रोह + आट् + वस् III. 4. 92 = रोहाव the स् being elided, as लोट् is like लङ् III. 4. 85 and 99). The verb एहि is the 2nd Person Singular of the Imperative of the root इण्, preceded by the Particle आङ् । Here in एहि रोहाव (= रोहाव आ इहि), the verb रोहाव is followed by the Particle आ, and does not retain its accent But for this rule, it would have retained its accent. Because एहि is a गत्यर्थ लोट् VIII. 1. 51), रोहाव is another लोट् in connection with it, and therefore, by VIII. 1. 52 it would have retained its accent, But now it loses its accent because it is a तिङ् following after a non तिङ् word स्वः । The visarga of स्वः is elided before र् by VIII. 3. 14, then the preceding व is lengthened and we have स्वा (VI. 3. 111). Another reading is स्वो रोहावैहि । It is a Vedic anomaly, the visarga is changed to उ ॥

३९६४ । चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः । ८ । १ । ५७ ॥

एषु परेषु परतस्तिङन्तं नानुदात्तम् । देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । 'अगतेः' किम् । देवः प्रपचति चन ॥

3964. A finite verb retains its accent, when it is not preceded by a Gati Particle (I. 4. 60 &c), and when it is followed by चन, चिद्, इव, गोत्र &c., a Taddhita affix, or by its own doubled form.

Thus देवः पचति चन ; देवः पचति चित्, देवः पचतीव । The list of Gotrâdi words is given under sûtra VIII. 1. 27. Thus देवः पचति गोत्रम्, देवः पचति मुसलम्, देवः पचति प्रवचनम् &c. The Gotrâdi words, here also, denote censure and contempt

With a Taddhita affix, देवः पचतिकल्पम्, रूपम् । The examples should be given with anudâtta Taddhita affixes, like रूपप्, कल्पप् (V. 3. 66 and 67). Any other Taddhita affix added to the verb would cause the verb to lose its accent, the Taddhita accent overpowers the verb accent : as पचतिदेश्य (V. 3. 67).

With a doubled verb, as; देवः पचति पचति ॥

Why do we say 'when not preceded by a Participle called Gati'? Observe देवः प्र पचति चन ॥

३९६५ । चादिषु च । ८ । १ । ५८ ॥

